स्योपमेयान्वयाभावेनतत्रापि चंद्रभिन्नाह्लादकत्वं चंद्रवृत्तिधर्मवाच्य चंद्र इति बोधसंभ

वात् इति चेत् चंद्रभिन्नत्वे सति चंद्रगतधर्मवानिति बोधस्यादि नतत्त्वापि कथं नैतद्बो

धः अवकाशः उभयभेदस्य चंद्रेपि सत्त्वात् व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वादिना अन्योन्याभाव

विशेषणादिति चेत् तादृशं विशेषणमेव किमर्थं देयमिति पर्यनुयोगात् तत्र विवक्षितबोधनिर्वाहार्थं भिन्न

वृत्तित्वस्वीकार इति त्वन्मतेपि तुल्यं नहि इवार्थभेदे तादृशप्रतियोगिताकत्वविशेषणं देयमेवेति नियमः ।

भेदविवक्षायां तत्रोपमात्वस्यापि स्वीकारात् न चात्र मानाभावात् प्रामाणिकैर्वक्ष्यमाणाङ्गीकारात् प्रस्तुतधर्मे चंद्र

भिन्नवृत्तित्वबोधेन चंद्रस्याप्यनिष्टसादृश्यप्रतियोगित्वलाभेन चंद्रनिष्ठसादृश्यप्रतियोगितस्य च वैकैदर्थ्यं ।

जनानुगुणत्वात् अन्यथोपमानतत्वाह्लादितवत्तद्रूपमेयान्तरव्याहृतेरपि व्यंजनप्रसंगात् न च हृष्यति चंद्र

स्यानिष्टसादृश्यप्रतियोगित्वान्यप्रतियोगिकसादृश्यानाश्रयत्वोभयबोधे चमत्कारोत्कर्षस्यापह्नोतुमन ।

र्हत्वादित्यलं बहुना इदं चात्र विभाव्यं साधारणधर्मस्य शाब्दत्वे तद्रूपेणोपमेये इवार्थः अन्यथा तु धर्मत्वेनैव ।

२१

तेष्वाचंद्र इव मुखं रमणीयं इत्यत्र चंद्रप्रतियोगिकान्योन्याभावसमानाधिकरणं यच्चंद्रवृत्तिरमणीयत्वं तदाश्रयो मुखमि
ति बोधः चंद्र इव मुखमित्यत्र तु तादृशचंद्रवृत्तिधर्मवन्मुखमिति अत एवात्रार्थी तीत्यमुपपद्यते साधारणधर्मस्योप
मानोपमेयोभयनिष्ठतायाः इवपदेन प्रतिपादनात् न च समानाधिकरणं तेन उपमेयवृत्तित्वं वृत्तं तेनोपमानवृत्ति
त्वमिति विवेकः न च चंद्रसादृश्यवृत्तित्वस्य ततो लाभेऽपि मुखवृत्तित्वस्य बोधात् कथमेतदिति वाच्यं उपमेयस्या
पि चैं ज्ञानतया समभिव्याहृतेन तद्वृत्तित्वलाभात् तावतैव प्रकृतव्यवस्थोपपत्तेः ननु साधारणधर्मप्रयोगस्थले
तस्यैव इवपदेन रमणीयादिपदेन च बोधने एकस्यानिरर्थकत्वान्नान्वयानुपपत्तिः न चोभाभ्यामेकमेवोपस्थाप्य
त इति वाच्यं तावतापि चंद्र इव मुखमाह्लादयतीत्यादावनुपपत्यनुद्धारात् आह्लादकत्वस्य धात्वर्थतया ना
मार्थे मुखविशेष्यत्वादिभेदसंबंधेनान्वयायोगात् धात्वर्थनामार्थयोः साक्षाद्भेदान्वयस्याव्युत्पन्नत्वात् न च चैत्रे
ण भक्ष्यत इति भावार्थकप्रत्ययस्थले धात्वर्थस्य प्रतियोगितासंबंधेन नञर्थेन कलंजं भक्षयेदित्यादौ नञर्थ
स्य विशेष्यताविशेषसंबंधेन भक्षणे वान्वयदर्शनान्नैष दोष इति वाच्यं तावता धात्वर्थनिपातार्थयोरन्वयेऽपि
नामा तातिरिक्तनामार्थधात्वर्थयोरन्वयस्यादर्शनात् अपि च हंसीव धवलश्चंद्र इत्यादेः कथं ... उक्तभे
दलिंगभेदस्यापि प्रतिकूलत्वादिति चेत् न तादृशस्थले आह्लादकत्वादिकं इवार्थ एव धात्वर्थस्तात्पर्यग्राहक

मात्रमि तिवाच्यत्वात् अथैवं हंसीव धवलश्चन्द्र इत्यादेः कथं दुष्टत्वं उक्तभेदे लिंगभेदस्य प्रतिकूलत्वादिति चेत्
मैवं । न हि शाब्दबोधप्रतिकूलत्वेनैव दोषत्वं उभयविशेषकयोर्धर्मिणोरपि श्रतिमभंगस्याभिहितत्वात् हीन
त्वादि दोषाणां तत्प्रतिकूलतायाः संभावयितुमपि शक्यत्वाच्च किंतु लिंगविशेषस्य उपमायां विशेषानुपपादक
त्वेन तत्प्रयोगस्यानर्थकत्वादेव दोषत्वं अत एव यत्र पुंलिंगेनुपमेये नित्यस्त्रीलिंगस्योपमानस्य न पुंलिंगता
संभवः यत्रैकवचनान्तेनुपमेये नित्यबहुवचनान्तस्योपमानस्यैकवचनान्तत्वसंभवं तत्र न लिंगवचनभे
देपि न दोषः तदुक्तमाचार्यदंडिना न लिंगवचने भिन्ने न न्यूनाधिकतापि च उपमादूषणायालं यत्रोद्वेगो न धी
मतां स्त्रीव गच्छति षंडोयं वक्त्यैषा स्त्री पुमानिव प्राणा इव प्रियोयं मे विद्या धनमिवार्जितेति सहृदयोद्वेगबी
जं तु उक्तरीत्याप्रकृतानुपयुक्तलिंगवचनविशेषोपादानमेव न च तन्निपातलिंगवचनेष्विति न तत्रोद्वेगस्य
लेशः । एवमेव काव्यादर्शविवरणकृद्भिर्मल्लिनाथादिभिश्च व्याख्यातं नियतवचनत्वं च यस्य शब्दस्यार्थाभिधा
नानियतसंख्यकत्वमतत्वेनानुशासनं तात्पर्यविषयत्वमिति यावत् प्राणा दारा इत्यादेस्त्वेकस्मिन्नपि प्रयो
गात्प दृष्टत्वाभिधानानियमात् नेव प्राणशब्दस्य कोशादावेकवचनान्तत्वेनानुशासनेपि पुंसि भूम्न्यसवः प्राणा
इति बहु बहुवचनान्तत्वेनाप्यनुशासनमस्त्येवेति न दोष इति भावः संभवः चेदागतं लम्यत्वमित्यत्र तद्गल्पदस्य

तो सादृश्यवानर्थः केवलसादृश्ये तदप्रयोगात् सादृश्याभिन्नं मुखमिति बोधापत्तेश्च नामार्थयोर्भेदान्वयस्याऽव्युत्प
त्तेः तदेकदेशस्य सादृश्यस्य च चंद्रप्रतियोगिकान्योन्याभावसामानाधिकरण्यं धर्मश्चार्थः आश्रयत्वं प्रत्ययांशार्थः
तृतीयार्थश्च इति चेत् न तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यामिति सूत्रात् अत एव चंद्र इव मुखं विभाति चंद्र इव मुखं पश्या
मि चंद्रेणेव मुखेन कृतमित्यादावुपमानस्योपमेयसमानविभक्तिकत्वनियमेपि चंद्रेण तुल्यं मुखं विभाति चंद्रे
ण तुल्यं मुखं पश्यामीत्यादौ न मुखे इति विभक्तिनियमः अन्यथा च चंद्रधर्मयोर्नामार्थयोस्तयाश्रयत्वसंबंधेन ध
र्मे चंद्रान्वयो न स्यात् अत एव इति तस्यापि तुल्यपदार्थकल्पनया न निस्तारः नामार्थतासाम्यात् ततश्च चंद्रप्रतियो
गिकान्योन्याभावसमानाधिकरणतस्य चंद्र इति तस्य च धर्मेन्वयः तस्य चाश्रयेण तद्धर्मिते तथा च चंद्रान्योन्याभाव
समानाधिकरणं चंद्र इति धर्माश्रयाभिन्नं मुखमित्यन्वयः अत्रोपमेयमिति तं धर्मोपस्थापकपदस्य उपमानमिति तं च
च तृतीयायाश्चार्थः अत उभयं धर्मवाचकपदार्थो न भवतीत्यन्वयार्थोऽपमेत्युच्यते न च उभयपदोपस्थाप्यात्कथमयं
विभाग इति वाच्यं इवादेः सादृश्ये शक्तिः तुल्यादेर्लक्षणया अपि कथमेवमिति तुल्यत्वात् प्रत्युत भिन्नपदप्रतिपा
द्यत्वेनास्य तत्त्वमेव विशेषात् चंद्रमिव मुखं पश्यामीत्यादावुपमानेपदोत्तरविभक्तिश्च विशेष्यत्वसमानलिंगत्वा
स्यातत्संसर्गिकत्वयात्साधुत्वार्थो न च प्रथमोपस्थितत्वयास्य साधुत्वार्थं प्रथममेवस्यादिति वाच्यं विशेषणातिरिक्तस्य लेत

ग्रं०कौ० २२ २२ ष्यत्वात् नच चंद्रस मुखोन्वयाभावान्न तथा विशेषणविशेष्ययोरभेदान्वयार्थमेवैकविभक्त्युपयोगादिति वाच्यं विशेष
णविशेष्ययोः समानलिंगत्वमेव ह्यौत्सर्गिकं न प्रचवसान्ता दन्वयोः भेदेनेत्यत्रादेतत् नच परंपरया विशेषण[illegible]पि तल्लिंग
त्वेऽनुकूलत्वं रक्तं दंडता दंडेन विशिष्टं इत्यादेरनुकूलादेरपि तत्तौ याप्यतेः नामार्थान्तराविशेषणीभूतेति विशेषणविशेषणस्य
देयत्वात् नच चंद्रादेरपि प्रतियोगित्वेन इवार्थभेदत्वं घटत्वयान्वयं कथं व्याहृतिरिति वाच्यं निपातातिरिक्तनामार्थान्त
रेति वाच्यत्वात् एवं च चंद्रेण तुल्यं मुखं पश्यामीत्यादावपि नातिप्रसंग इति नन्वेवमपि अव्ययविशेषणतां न पुं
सकत्वं भवति सनत्वात्सनादिवार्थविशेषणस्य चंद्रादेः क्लीबत्वापत्तिरुर्वीरेति चेत् मैवं शस्त्रीश्यामा शस्त्रीश्यामा
मृगीव चपला मृगाचपला इत्यादिभाष्यकारादिप्रयोगसामर्थ्यादुपमानवृत्तिलिंगसिद्धेः अत एव पार्थिव एव धनुर्धरः
इत्यादावपि नानुपपत्तिः अयमियत लिंगविशेषणत्वादुक्तानुशासनस्य भाष्यादिसम्मतत्वात् चंद्रस्य तुलेत्यादौ तत्तु
ल्यशब्दस्वरूपवशाद्वत्ता दृश्यमात्रमर्थत्वेपि तदर्थभेदादौ प्रतियोगित्वादिसंबंधेन चंद्रादेरन्वयासंभवात् तत्र षष्ठी
प्रयोग इति विशेषः नत्रश्लोकार्थत्वविशेषास्तु यमलमावसदेवत्वत इति चंद्रो मुखं च तुल्यमित्यादौ तु तुल्यपदार्थस्य
वशाद्वाच्य तदेतन्नयोगबलेन चंद्रमुखयोर्युगपदन्वयावगमात् चंद्रप्रतियोगिकान्योन्याभावसमानाधिकरणात्
वृत्तिधर्मवन्मुखं मुखोन्योन्याभावसमानाधिकरणात् वृत्तिधर्मवांश्चंद्र इति बोधः अत एव मुखं चंद्रसदृशं न वाच्यं

द्रोमुखं सदृशेन चन्द्रमिति संदेहः दृष्टान्तमिति ततो निवृत्तिः तुल्यपदसार्थैकदेशस्य सादृश्यस्य च शाब्दबले नोभयत्रान्वयेपि सा
दृश्यवाचकपदस्योभयत्रधर्मान्वयबोधकत्वविरहः स्पष्ट एव तस्माद्यत्र धर्मोपस्थापकपदस्योभयत्र संबंधबोधकत्वं
तत्रैवेति यत्र तात्पर्यार्थो निश्चितं उपमानादिविशिष्टत्वनियतशाब्दबोधविषयत्वमेवेति त्वं इवादौ तथानियमात् त्व
त्वादौ तु चंद्रेण तुल्यमित्यत्र तथात्वेपि चंद्रो मुखं च तुल्यमित्यत्र प्रकृते तत्वादिनैवोपमानोपमेयभावप्रतीतेर्विलं
बादिति प्रकाशसिद्धांतः दीधितावपि सादृश्यप्रयुक्तविशेषकत्वानजनकपदप्रयोगेवेति यत्र तात्पर्यार्थो स्यादः इवा
दिभिः सादृश्यमनुयोगित्वसंबंधेन बोध्यते तुल्यादिभिस्तु सादृश्याभेदेनेति विभागः इत्यन्ये तुल्यादिपदेष्वपि सामान्यम
विवेकेन सादृश्यायैवविधेयत्वान्नेदं सम्यगित्यपरे अथ धर्मोपस्थापकपदस्योभयसंबंधबोधकत्वेनैवेति ति
पदेन तुल्यार्थकवतिप्रत्ययप्रयोगेपि स्यादिति स्यात् तथाहि तुल्यादिपदोपादाने वृतित्वादीनां नामार्थेन तत्र चंद्रादे
रन्वयासंभवः अत्र तेषामेव शक्तिकल्पनात् तत्र वृतित्वधर्माभेदश्चवत्यर्थः एवं च देवदत्तवच्च
द्रोन्याभावसमानाधिकरणं चंद्रवृत्तिधर्मवन्मुखमिति च चंद्रवन्मुखमित्यत्र बोधः न चैवमपि
तिः तत्रार्थोपमेति सकलग्रंथविरोधापत्तेरिति चेत् उच्यते तेन तुल्यमिति तुल्यार्थवतिविधानं तथा च यावदेव
तुल्यपदेन बोधयितुं शक्यते तावदेव वतिनापि आनुशासनिकार्थातिरिक्तार्थबोधकत्वे सर्वत्र व्यवस्थापतेः एवं

अ·कौ·
२२
23

यत्तत्रापि चंद्रपदस्य तद्वृत्तित्वमेकत्र ... लक्षणा उक्तरीत्यानुशासनसंमतत्वात् अतो नानुपपत्तिलेशोपि अतएव
एवंवत्सत्व ... वंस्यादिवेति भाष्यं पंचम्यंता इति विधानाभावेनानुपपन्नमाशंक्य कैयटे-
नोक्तं न स्यार्थे वि ... दिनामस्तीयासर्वविभक्तिर्थानंतर्भावयतीति पंचम्यर्थस्यार्थग्रहणस्योपपन्नमेव यथा
वा ... स्तगावदूपयादधीते ब्राह्मणादिवद्वैश्यादधीत इत्यर्थः वैश्यापादानकमध्ययनमस्य ब्राह्म
णापादानकमध्ययनमुपमानमिति तत्र च ब्राह्मणशब्दो वर्तते तेन ब्राह्मणेन तुल्यं वैश्यादधीत इति तृतीयांता
इति चेवमिहापि स्यादेवं वदिति अथ वतिप्रत्ययप्रकृत्यर्थस्योपमानत्वनियमाद्बृहतित्वमेवोपादानं स्यादिति चेन्न
प्रकृतिवाच्यस्यैव तथात्वात् अन्यथा चंद्रत्वादेरप्युपमानत्वापत्तेः न चैवं ब्राह्मणाध्ययनमुपमानमिति ग्रंथविरो
धोऽध्ययनस्य लक्षणत्वादिति वाच्यं भवानन्दबोधात् प्रत्ययोत्पत्तिदशायां यदर्थबोधकत्वं तस्योपमानत्वनियमात्
न चैवमपि द्वृत्तित्वस्य धर्मान्वयानुपपत्तिः प्रकृत्यर्थत्वाभावादिति वाच्यं प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्व
मिति नियमे शाखालक्षणाधारणाप्रकृत्यर्थोपादानात् अन्यथा गंगायां घोष इत्यादौ तीरादेः सप्तम्यर्थाधारत्वयोनस्या
त् तस्मात्तस्यार्थे वतिविधानानर्थक्यतन्मुक्तिरिति सिद्धं यत्तु ब्राह्मणवत् वृषलवत् ब्राह्मणा इव वृषला इवेति लि
ङ्गोक्तेः प्रथमे न तत्कल्पितार्थकथनमात्रं प्रथमा इति विधानाभावात् किं च तत्तुल्यादिपदानां सादृश्यमात्रार्थत्वेना

२२

नार्थत्वाभावादेतल्लक्ष्यार्थानुपपत्तिरूपबाधकाभावेन तन्मतेऽपि न तच्छ्रौतीत्वं स्यात् उपमानादिविशिष्टविषयत्वानि
यतत्वान्न बोधविषयत्वस्यापि वतिप्रतिपत्त्यावच्छेदेन व्यभिचाराभावेन सादृश्यमात्रविशेषकज्ञानकत्व वस्तुत्वात्
अत्र योगिनिसंबंधेन तद्बोधकत्वस्यापि वतिप्रत्ययस्य तुल्यार्थे विधानेन तद्योगी यथा आर्थी तथा वति वतिप्रत्ययप्रयो
गेऽपीति तत्र यापि कल्पनीयं तदानुशासनिकमेव तत्तुल्यपदसमानार्थकत्वं वतिप्रत्ययस्य तथाऽनुशासनीयमिति निर्द्
ष्टलक्षणोपयोगी विनान्यथा समालंबित इत्थं न व प्रमाणावष्टंभस्य प्रमोपदिचोद्याभासउद्भावत इति मद्दत्ताहृतं
मतुर्कं · सा ग्रामबोधकत्वमायेये बोधार्गितमोदकाः (सवीर्यविपाकादिवत्त्वं तेषां प्रसज्यत इति दिक् ॥ केचित्तु सा
दृश्यपदार्थांतरमभ्युपगम्यैवं बोधमाहुः अरविंदसुंदरमित्यत्रारविंदपदस्यारविंदनिरूपि
त सादृश्यप्रयोजके लक्षणा तस्य चाभेदसंसर्गेण सुंदरपदार्थैकदेशे सौंदर्येऽन्वयः वैत्रस्य तदे
त्यात् वैकदेशान्वयस्य वक्ष्यमाणत्वात् तथा चारविंदनिरूपितसादृश्यप्रयोजकाभिन्नसौंदर्यव
दभिन्नं मुखमिति धीः समुदायस्यैवैतादृशविशिष्टार्थपरत्वेऽप्येके अरविंदपदस्यैव लक्षणा
यास्वीकारः सुंदरपदं तात्पर्यग्राहकमिति मते श्रौतीत्वे पतत्त्रयेऽपि अरविंदसुंदरमित्यत्र समासगतवाचकलुप्तो
पमात्वं सिद्धांतसिद्धमसिद्धं स्यात् सादृश्यवाचकपदसत्त्वात् न च सादृश्ये तिलक्षणेति न तद्वाचकपदसत्त्वमिति

प्र·कौ·
२४
24

तद्विरोध इति वाच्यं वाचकत्वस्यैव हेतुतया तद्रूपस्य ज्ञापकत्वमेव न तु शक्यत्वं तभीवो गौरवात् अन्यथा तेन तत्त्वमित्यादिना
विहितस्य वर्णादेरपि भथमिश्रकृततया पदार्थतावच्छेदकीभूतस्यास्वरूपेण शक्यत्वाभावात् तत्रापि वाचकत्वमसत्त्वापत्तेः नच
त्वन्मतेपि वर्णादीनां स्वरूपेण शक्तिलक्षणान्यतराभावेन दोषसाम्यमिति वाच्यं हेतुतात् तद्विषयतानियतबोधजनक-
त्वस्य विवक्षितत्वात् न च हेतितस्य शक्तिलक्षणान्यतरत्वरूपस्य निवेशापेक्षया शक्तिनिवेशे कुतो गौरवमिति वाच्यं
शक्तिजन्यबोधस्य लक्षणाजन्यबोधात्मकत्वेन लक्षणाभावेन विशेषनिवेशानुपपत्तेः चमत्कारप्रयोजकरूपस्यैवोपमा-
विभाजकत्वात् अत एव स्वगनयनाद्वैतेस्तनेमिन इत्यत्र वाचकधर्मोपमानलुप्तास्वदाहृतता काव्यप्रकाशकृतास्व-
मपुपमाने त्यादिना समासलोपो यदा भवतत्तदेतदुदाहरणमित्युक्तं यदा तु कैयटाद्युक्तरीत्या स्वगपदस्यैव स्वर्गा-
नयनस्य रूपो लक्षणेति स्वीक्रियते तदा तदर्थकस्वर्गापदाहृतसत्त्वेनोपमानलुप्तत्वाभावादित्यदिनदाशयः यदपि ते
उक्तं तत्रापि त्रिलुप्तैव लक्षणापदे हृते विशिष्टार्थवाचकत्वमिति वैयाकरणमतेपि स्वस्वमात्रबोधकपदाभावात् त्र-
याणां लोपमायादिति तदप्यसत् मात्रपदोपादाने बीजाभावात् गौरवाच्च स्वेतरबोधकत्वे सति स्वबोधकत्वस्य तदर्थ-
त्वात् अपि चेन्न उपमानादिपदानामपि चंद्रादिपदस्य चंद्रत्वतत्संबंधादिबोधकत्वात् अथ स्वविषयकत्वाभाववद्वृत्तिवि-
षयिताकान्यज्ञानजनकत्वं तदर्थ इति चेत् नहि प्रकृतेपि वक्तव्यमलत्वदृष्टिप्रवेशः अनपवकाव्यमस्य दर्शमित्यमसट

यापदस्योपमानेलक्षणांकृत्वा तदानींसादृश्यवाचकपदाभावेनाद्विलुप्तत्वंस्यादित्याशंक्य सादृश्यप्रतियोगित्वरूपोप
मानत्वार्थकसादृश्यपदसत्वेनवाचकलोपाभावइतिव्याख्यातंन्यायालंकारादिभिः तदीमामलक्षणागमोपपत्तौलुप्तत्व
व्यवहारान्तरलक्षणतावच्छेदकीभूतसादृश्यस्यमुखवाक्यतदर्थत्वाभावाद्अनुपपत्तिस्यात् किंच अरविंदवत्सुंदरमित्यत्रते
नतुल्यमितिविवक्षितस्यवृत्तेःसादृश्यवदर्थस्यसादृश्येलक्षणोपक्रमकाललक्षणयातदभिधानादाधिक्यमितिस्वयमेवोक्तं
अत्रत्वरीत्यावतत्रापिवाचकलुप्तत्वंस्यादितिसम्प्रदायविरोधेपिरःपरिहरइतिदिक् ॥ अरविंदमिवभगवतीत्यत्र
इवार्थःसादृश्यं नचारविंदस्यनिरूपितत्वसंबंधेनान्वयः सादृश्यस्यचप्रकारतासंबंधेनधात्वर्थेनान्वयः तथाचार
विंदनिरूपितसादृश्यप्रकारकधीविशेष्यइतिबोधः सौंदर्येणोपमानसादृश्यपादानेतृतीयार्थःप्रयोज्यत्वंधात्वर्थेभानेसादृ
श्यइवार्थेवान्वेति तेनसौंदर्यप्रयोज्यारविंदनिरूपितसादृश्यप्रकारकधीविशेष्यइतिबोधइति अत्रब्रूमः प्रकारतया
सादृश्यान्वयबोधंप्रतितदव्ययोप्युपस्थापकपदजन्योपस्थितित्वेनहेतुत्वेपिकार्यकारणभावोलाघवात्कल्पते अर
विंदइवमुखमित्यादिसाधारण्यात् अरविंदनिरूपितसादृश्यवन्मुखमित्येवबोधात् सुंदरादिपदोपादानेपितादृशा
सादृश्यवन्मुखंसुंदरमित्येवबोधात् सादृश्यप्रयोजकधर्माकांक्षायांसौंदर्यस्यैवअनुमानमनन्तत्वेनविषयीकरणाद्व
सौंदर्येणास्तुतोवसौंदर्यप्रयोज्यारविंदसादृश्यवन्मुखमितिबोधः नचमुखत्वेनचंद्रइवेत्यादौसादृश्यस्यप्रतियोगि

अं॰कौ॰
२५
25

तासंबंधेन न तत्र्थे प्रकारत्वाव्यभिचार इति वाच्यं प्रतियोगित्वातिरिक्तत्वस्य कार्यतावच्छेदकसंबंधविधेयत्वात् प्रकृते च
तेन संबंधेन तदनुदयात् एवं च सादृश्यं मुखे वृत्तीत्यत्रापि न व्यभिचारात् अत्र प्रकारतासंबंधेन सादृश्यस्यान्वयाबो
धात् नन्वेवं सति अरविंदमिव सुंदरं मुखमिति शाब्दबोधात् मुखवृत्तिरविंदीयसादृश्यं सौंदर्यप्रयोज्यं न वेति संदेहनिवृ
त्तिर्न स्यात् तदीयसादृश्ये सौंदर्यप्रयोज्यत्वस्य मानसगम्यत्वात् न च तत्र मानसोत्तरमेव संशयनिवृत्तिर्न तु शाब्दबोधा
व्यवहितोत्तरं तत्क्षणाविलंबस्यानुग्रहत्वादिति वाच्यं तत्कल्पने प्रमाणाभावादिति चेत् न अरविंदमिव भातीत्यत्र अर
विंदनिरूपितसादृश्यप्रकारकधीविशेष्य इत्येतद्बोधादस्य अरविंदसादृश्यं न वेति संशयानिवृत्तिप्रसंगस्तत्वात् तत्क्ष-
विलंबकल्पनस्य चोभयत्र साम्यात् एवं च अरविंदमिव भातीत्यत्रापि तादृशसौंदर्यवन्मुखं ज्ञानविषय इत्येव बोधः
अन्यथा उक्तकार्यकारणभावव्यभिचारापत्तेः तादृशसंबंधेन बोधे धातुजन्योपस्थितिहेतुत्वकल्पनागौरवाच्च नन्वेवं
चैत्रीयसादृश्यप्रकारकज्ञानाभावेऽपि अरविंदमिव मुखं चैत्रस्य भातीति प्रयोगः स्यात् तादृशसौंदर्यवतो मुखस्य ज्ञान
विषयत्वसत्वात् ममत्वसादृश्यप्रकारकत्वस्य ज्ञाने लाभात् न तथेति चेत् इष्टापत्तेः दृष्टांतरेण मुखप्रकारकज्ञानस
त्वेऽपि मुखं चैत्रस्य भातीत्यादिप्रयोगात् न च मुखत्ववन्मुखं भातीति न तदा प्रयोग इति वाच्यं बाधकाभावात् प्रकार
त्वाधिक्यविभक्त्यादिविरहाच्च वस्तुतो मुखत्ववत् यत् वस्तु मुखं भातीति बोधात् अत एवोक्तबोधाद्वैत्रो मुखत्वप्रकारक

ज्ञानत्वान्नवेति संशयानिवृत्तिः अत्रास्माकमरविंदस्य हृष्टपत्रवत्त्वं भातीत्यत्रापि वक्तव्यो ऽरविंदस्य हृष्टपत्रवत्त्वं ज्ञानविषय इत्येव
बोधः मानांतरेण च चैत्रीयज्ञानस्य हृष्टपत्रप्रकारकत्वनिश्चयेन तस्य हृष्टपत्रप्रकारकज्ञानत्वान्न वेति संशयनिवृत्तिर्नतत्वा
श्रयेत्यनुभवसिद्धमेतत् तदवच्छिन्नप्रकारताकज्ञाननिश्चयस्यैव तदवच्छिन्नप्रकारताकज्ञानाभावबुद्धिप्रतिबंधकत्वात्
अरविंदं सुंदरं सुखममभातीत्यस्मात् तु वाक्यार्थज्ञानविषयावच्छिन्नविस्य हृष्टपत्रप्रकारकज्ञानत्वस्यालभ्यते अत एव चारविं
दं सुंदरं सुखं वा ज्ञानं यथास्थितमेव भातीत्यादावपि न ज्ञाने तत्प्रकारकत्वलाभ इति स्पष्टमेव अपि च अरविंदमिव
भातीत्यस्मादरविंदस्य हृष्टं न वेति संशयनिवृत्तिरनुभवसिद्धा सा च त्वदुक्तरीत्या दुर्घटा न च तत्र अविलंबकल्प
नान्निस्तारः तत्प्रकारकधीविशेष्यत्वस्य तदुक्त्वाभिधानेन तदुत्तरमपि अरविंदस्य हृष्टमिति ज्ञानस्यासंभवात् न च
प्रमाविशेष्यत्वं तदर्थ इति वाच्यं कुमुदमिव सुखमित्यादौ तदसंभवात् प्रमाया धात्वर्थत्वाभावाच्च अस्माकं त्वरविंदस
हृष्टत्वं ज्ञानविषय इति बोधप्रतिबंधकत्वानभिधानात्काप्यनुपपत्तिः न चैवमपि सुखमरविंदमिव भातीत्यत्रा
रविंदस्य हृष्टप्रकारधीविशेष्य इति धीर्नादृष्टकीति वाच्यं तत्रापि सुखप्रकारकज्ञानविषयत्वसंबंधेन सुखहृष्टवधियेव
बोधात् धात्वर्थकसंसर्गेनात्पर्यग्राहकत्वात् न च सुखहृष्टप्रकारकधीविषयो न वेति संशयाद्यनिवृत्तिप्रसंगः तत्प्रका
रकत्वतदभावज्ञानेन तत्संसर्गकबुद्धेरप्रतिबंधकत्वादिति वाच्यं तादृशस्यापि प्रतिबंधकत्वाभ्युपगमात् तत्र अविलं

अ॰कौ॰ वकल्पनादेवेतिदिक् ॥ अत्र पद्मारविंदतुल्यो भातीत्यत्रापि नात्वपपत्तिः तत्त्वतेसादृश्यस्य निपातभिन्ननामार्थत्वेन धात्व
२९ र्थभेदेनान्वयानुपपत्तेः नचाप्रमुख्यपदस्य तुल्यत्वप्रकारकेलक्षणा तस्यचाभेदसंबंधेन धात्वर्थान्वयप्रसंगइतिवाच्यं
२६ तथासति क्रियाविशेषणानां कर्मत्वनपुंसकलिंगतायवकर्मत्वेनि अनुशासनात् क्लीवत्वापत्तेः यत्तुस्तोकंपचती
त्यादिविषयत्वमात्रेणानुशासनोपपत्तिरिति तदसत् संकोचेमानाभावात् अपिच अरविंदतुल्योभाति अरविंदवद्भा
तीत्यनयोस्तुल्यविषयकोनुभवः तत्रतु प्रथमे अरविंदतुल्यत्वप्रकारकत्वप्रकारकाभेदसंसर्गकज्ञानविशेष्यकः
द्वितीयेतु अरविंदसादृश्यप्रकारकत्वसंसर्गकज्ञानविशेष्यक इतिवैषम्यापत्तिः अरविंदतुल्योनभवतीतिशाब्दबोधो
त्तरं अरविंदवद्भातीत्येन द्वाव्यकाजन्यशाब्दबोधापत्तिश्च ग्राह्याभावानवगाहिमतिबंधकत्वाभावात् यदपिवतेः केवल
लक्षणया सादृश्यप्रकारकज्ञानमर्थः तुल्यपदं तात्पर्यग्राहकमिति तदप्यसत् तुल्यपदस्य सादृश्यानुपस्थापकत्वेउक्तो
पमायाश्चार्थत्वव्यवस्थितिभावात् नचसादृश्यतात्पर्यग्राहकतामात्रेण तथात्वमितिवाच्यं तात्पर्यग्राहकस्यश्रोतत्व
व्यवस्थापकत्वेमानाभावात् किंचतथापि क्लीवत्वापत्तिः निर्वार्यैव स्वार्थपरविशेषणस्यैव समानलिंगत्वमितिचेत्
तर्हि सामान्येन नपुंसकमिति क्लीवत्वपरादृतं पुंस्त्वं कथं समादधीयात् तस्मात् आलंकारिकसिद्धांतानुरोधितं यथोक्त
रीत्याश्रयणमेवयुक्तमित्यलंबहुना ॥ गजइवगच्छतिपिकइवरौतीत्यादावपि गजपदस्य तत्कर्तृलक्षणा तस्यसा

२९

दृश्यप्रतियोगित्वेनान्वयः तस्यानुयोगित्वेन धात्वर्थे गमने तथा च राजगमनसदृशगमनानुकूलकृतिमानित्या
दिबोधः इति केचित् धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंबंधेनान्वयबोधं प्रति विशेष्यतया विभक्त्यर्थोपस्थि
तिहेतुत्वस्यावश्यकल्पनतया सादृश्यस्य धात्वर्थान्वयासंभवात् सादृश्यस्य गमन[illegible]न्वयः कर्तरि राजसादृश्यं
वत्त्वगमनसदृशगमनकर्तृत्वमित्यपरे केचित्तु एवं सति सादृश्यस्य विधेयतया प्रतीतिरनुभवसिद्धा न सिध्येत् गा
ज इव यः पुरुषः स गच्छति पुरुषो यः स गज इव गच्छतीत्यादिवाक्याभ्यां भिन्नविधेयकप्रतीतिजननात् एवं गज इव य
इदं देवदत्तो गच्छतीत्यादौ वनादेरन्वयापत्तेश्च गजनिरूपितसादृश्यप्रयोजकगमनाश्रय इत्येव बोधः उक्तकार्यकार
णाभावश्च नांगीकार्यः तव घटो न पश्यतीत्यत्र घटाभावं पश्यतीति बोधवारणाय तदावश्यकत्वमिति वाच्यं धात्वर्थनिष्ठ
विशेष्यतानिरूपितप्रकारतासंसर्गेणान्वयबोधं प्रति नञ्जन्योपस्थितिमात्रस्य प्रतिबंधकल्पनादित्याहुः वस्तु
तस्तु गजप्रतियोगिकसादृश्यवान् पुरुषो गमनानुकूलकृतिमानित्येव धीः सादृश्यस्य च धर्मीतरनिमित्तकत्वे
तात्पर्यज्ञाने उक्तविषयत्वावश्यकत्वात् यत्रापि गमनप्रयोज्यमेव सादृश्यं विवक्षितं तत्रापि सादृश्ये गमनप्रयोज्यत्व
ज्ञानं मानसमेव अत एव धर्मीतरप्रयोज्यसादृश्यविवक्षायां पुरुषगमनं न गजगमनसदृशं इति बाधज्ञानसत्वेपि
गजसदृशः पुरुषो गमनानुकूलकृतिमानिति धीर्भवत्येव अयं चात्र विशेषः धर्मीतरप्रयोज्यसादृश्यविवक्षा

ग्रं·कौ· पंगजइवगच्छतीति धर्मलुप्तायां गमनप्रयोजनसादृश्यविवक्षायां तु न तथेति मुखगमनस्यसाधारणधर्मत्वायामानसग
२१ म्यत्वात् तन्मते गमनप्रयोजनसादृश्यविवक्षायामपि धर्मलुप्तत्वापत्तिरिति वाच्यं साधारणधर्मस्य शाब्दत्वादेव तद्भा
२८ वात् न हि शाब्दबोधगम्य एव धर्मस्य साधारणत्वेन धर्मलुप्तत्वापत्तिरिति वाच्यं साधारणधर्मस्य शाब्दत्वादेव तद्भावात्
न हि शाब्दयौ बोधपथ एव धर्मे गम्य एव धर्मस्य साधारणत्वेन धर्मलुप्तत्वनितिनियमे प्रमाणमस्ति विंबप्रतिविंबभावादे
शाब्दबोधेतरं उभयोर्धर्मयोरभेदस्समानस्तविषयतया तत्रापि तदापत्तेरसंभवापत्तेश्चेति न किंचिदेतत् एवं पिकइ
वरौतीवचंद्रदविम्नाहूवीवभूयइत्यादावपि पिकरुतसादृश्याहतानुकूलव्यापारं वानइत्यादिबोधः पिकप्रतियोगिक
सादृश्यवान्रौतीत्यादेरीवबोधस्यस्वीकारात् न तु रुतं सादृश्यसहकृतनिमित्तकत्वज्ञानं मानसमेवेति सर्वनिर्वाहात्
न स्वेदमनुपपन्नं तथा हि पयस्य गजसादृश्याभावव्याप्यवत्प्रमनं रस्यपेक्षत्वादुच्यात्मकः परामर्शो गजइवगच्छतीति
शाब्दबोधसामग्रीवतन्न शाब्दबोधो जायतामितिच्छासत्वेऽपीच्छाघटितत्वेन शाब्दसामग्र्या बलवत्वाद्गजसदृशो गच्छ
तीति बोधः न तु तत्र तत्र गजगमनसदृशं न गमनमित्यनुमितेर्वोत्पत्त्या गजगमनसदृशं गमनमिति मानसं तत्सं
भवति एवं तद्रूपबाधस्तानसत्वात् न तु तत्र तत्रापि तन्नासादृश्यमानसमसंभवः तथा च सादृश्ये गमनप्रयोजनत्वस्तानं
सर्वानुभवसिद्धं न निर्वदेत् मम तु मगते गजगमनसादृश्यस्य शाब्दबोधविषयतया शाब्दबोधकाल एव तद्बोधा

बाधकत्वात्त्वानुपपत्तिरिति चेत् उच्यते नह्यपि शाब्दबोधात्र वर्ण्यतत्त्वप्रसाहचर्येण गमनमयोग्यत्वज्ञानाभ्युपग
मेत्तत्तिविरहाद्रहात् किंच गजइवगच्छतीत्येतद्वाक्यजन्यशाब्दबोधात् पुरुषो गजसहचरो नवेति संशयायतिहृतिरस्तु
भवसिद्धा गजसहचरो नेति ज्ञाने सत्येतच्छाब्दबोधानुदयश्च पनश्चाब्दबोधे सति गजसहचरो नेति तु अस्त्वनिश्चेति
निर्वाविवादं तत्कर्मत्वेन गमनमेव गजगमनसाहचर्यबोधेपि पुरुषे गजगमनसाहचर्यस्यैतद्विषयत्वात् सर्वमिदं उद्घटं मनमनु
पुरुषे गजसाहचर्यस्यैतद्विषयतयानानुपपत्तिः नचधर्मिसाहचर्येण धर्मिसाहचर्यस्यापि सिद्धात्तणाविलंबकल्पनाददो
षइति वाच्यं गजसहचरो नेति बाधज्ञाने सत्येव तज्जन्यशाब्दबोधापत्तेस्तथाप्यपरत्वात् नचतत्कर्मत्वेपि गमनं च गमन
सहचरामिति ज्ञाने सत्यपि उक्तशाब्दबोधापत्तिरस्त्वेति वाच्यं गजसहचरो नेति बाधज्ञाने सत्येव तज्जन्यशाब्दबोधापत्ते
स्तथाप्यपरत्वात् नचतत्कर्मत्वेपि गमनं च गमनत् मनशाब्दबोधात्पूर्वं गजसहचरो योग्यताज्ञानसमभावाच्चाबाधकत्वा
त् तत्तत्वेव तत्कर्मत्वसाहचर्यबोधस्यापिसामग्रीसत्वेनाबाधकतया न गजगमनसहचरामिति बोधस्य पूर्वमतिय
मात् तद्दोषेपि बाधकाभावात् न गजगमनसहचरामिति ज्ञाने सति च गजसाहचर्यज्ञानं न हि पर्ययोग्यताज्ञानाभावाद
बतदनुत्पत्तेः नचमम्मापि गजगमनसहचरामिति योग्यताज्ञाने गजसाहचर्यज्ञानस्यापि सत्येनोत्कर्षीत्येवनानुप
पत्तिरिति वाच्यं धर्मसाहचर्येण धर्मिसाहचर्यपतियमाभावात् नहि धर्मिसाहचर्यं विना धर्मसाहचर्यमनुपपन्नं अपित

ग्रं·कौ· धर्मिसादृश्यं विना धर्मिसादृश्यमेव उपपादकस्योपपाद्यं विनानुपपत्त्यभावात् अन्यथा उपपाद्योपपादकाभावव्याघा
२८ तापत्तेः तथा च गगनसादृश्येन तद्गमनसादृश्यं विना धर्मिसादृश्यमेव उपपादकस्योपपाद्यं विनानुपपन्नमिति तस्य त
२४ दाक्षेपकत्वमनुचितं न तु गगनसादृश्यस्य गगनसादृश्यस्याक्षेपकत्वं अतस्तद्गगनगमनसादृश्यस्यैव मानसत्वकल्पनमु
चितमिति यदि तु गगनवत्सादृश्याभिप्रायेणैव गगनमिव गच्छतीत्यादिप्रयोगा इति प्राप्यपि यः क्रियते तर्हि प्रतियोगित्वाति
रिक्तसंबंधावच्छिन्नप्रकारतानिरूपकसंसर्गेण सादृश्यान्वयबोधं प्रति तद्वत्त्वयोग्योपस्थापकपदजन्योपस्थितित्वेन हेतुत्वमि
ति कार्यकारणभावे पदं सादृश्यसामान्यबोधं प्रति अतो धात्वर्थस्यापि संग्रहः एवं च गगनस्य सादृश्याप्रतियोगितया धात्वर्थेऽपि तत्र सा
दृश्यान्वयः तथा चन्द्रबिंबमिव भातीत्यादौ तादृशसादृश्यान्वयोऽनुचित एवेति दिक् ॥ सदृशार्थकीदृशस्य पदस्य योगे श्रौ
ती कीदृशस्यार्थी यथा यादि च पदादियोगे वत्या इव पदार्थे च सा श्रौती तुल्यादिकपदयोगे वतौ तदर्थेऽपि चार्थी श्रौती
इवयथावाशब्दस्य वादिपदाद्वा शब्दादीनां तत्र तस्येवेत्यनेन षष्ठीसमर्थात्सप्तमीसमर्थाच्च इवार्थे विहितस्य वति
प्रत्ययस्य चोपादाने श्रौती तुल्यसदृशादिपदयोगेन तत्तुल्यार्थे विहितवतियोगे चार्थी सर्वथा उपमानार्थका यथा कादंबिना
काव्यादर्शे इववद्वायथाशब्दाः समाननिभसन्निभाः तुल्यसंकाशनीकाशप्रकाशप्रतिरूपकाः प्रतिपक्षप्रतिद्वंद्विप्रत्य
नीकविरोधिनः सदृक्सदृशसंवादिसजातीयानुवादिनः प्रतिबिंबप्रतिच्छंदसरूपसमसम्मिताः सलक्षणसदृक्षा

भाः सपत्नोपमितोपमाः कल्पदेशीयदेश्यादि प्राक्प्रतिनिधीभ्यस्यि सवर्णाल्तलितोऽशाह्यैयेवास्मनाथवाचिनः समासस्त्र
बहुव्रीहिः शशांकवदनादिषु सर्जितेऽप्रतिहेष्विज्रितिप्रतिगर्जेति आक्रोशान्तं वज्जालानातिकदर्थयति निंदति
खंडयति संरुद्धेद्दसतो ख्यत्वस्यति तस्य पुष्पाणि सौभाग्यं तस्य कांतिं विलुंपति तेन सार्द्धं विग्रह्णाति कुलं तेनाथ
रोदति तत्पदवीं पदं धत्ते तस्य कक्षां विगाहते तमन्वेत्यनुबध्नाति तच्छीलं तन्निषेधति तस्य चानुकरोतीति शब्दाः सा
दृश्यसूचिनः प्रतिकल्पलतायां वेधश्चौरामुद्यिहारी कल्पः प्रख्यः समः प्रभुः देशीप्रदेश्यप्रभ्याभसोदपादवार्थकाः
वं वायथा तथैवैवं इव समेरेवषाद्धोपिइवार्थः शात्रवं वव प्रर्यथाइति कालिदासः कादंबखचितदलानिवपंकजानीतिइ
वप्रयोगः अत्र निपातसंज्ञा प्रवादयः वदिति इवार्थे तुल्यार्थे ववतिप्रत्ययः कल्पदेशीयदेशीयप्रभृतिभिः प्रत्ययाः ते
न यद्यपि ईषदसमाप्ताविति सूत्रेण विहितास्तथापि तुल्यार्थोऽपि ईषदसमाप्तेरपि माहात्म्यपर्यवसानात् तदुक्तं
कैयटेन गुणत्रयवदीषदसमाप्ताशास्त्रागुडकल्पायपि द्वौपम्यान ग्रहणंतोपात्तं तथापि समस्त
उपमानोपमेयमितिवाच्यलिंगाः समस्तल्पः सदृशः सदृक्ताधारणः समानश्चसुहृत्तवसीत
मोऽविभक्तकाशीतीकाशमतीकाशोपमादयश्चसमः तत्र प्रत्ययादीनां उपमानोत्तमेव प्रयोगः तसेवतत्प्रकृति
त्वात् विभादीनां तु नित्यसमासविषयत्वात् चंद्रेणाम संचंद्रनिभं इत्यादिरीत्या विग्रहः कार्यः तत्र कतीरस्वामिना

अ॰कौ॰ उक्तपदेस्यकेष्वंइनिभमितितिनभवतीतिवेविवाचकाः सदृशवाचकाश्च शब्दाः साहश्यार्थाः स्तेयाः पाशांकवदनेत्यत्रसमस्य
२५ पमानस्यैवपदेवद्भ्रौहीवितिसमासः मतिविंवसङ्गतदन्यादयःसाहश्यवाचकाःस्तेयाः॥ तत्रवाचकलोपोतीय
२१ था इतीहशीनैषधस्यत्वनामसते विदर्भजन्माभृयसमुल्लास अतोरधिश्रीःशिशिरात्वजन्मनः यिकस्वरेऽपि विक
स्वरैर्यथा॥ अत्रवसंतश्रीरुपमानं भेस्रुपस्तेयाः यथेत्युपमानवाचि उल्लासेतिसाधारणधर्मः नचैषांकस्यापि
समासइतिवाक्यगा यत्प्राचीनैःवाक्यगायांयथाशाह्यपदोइदतः तत्र इवेनापिसमासस्यनित्यत्वाभावात् अन्यथा
उदाहृतिववामनइत्याद्यनुपपत्तेः जीमूतस्येवेत्यत्रषष्ठ्यांतवेसमासेनषष्ठ्यांतरेवासमासेनपदःकौस्तुभाह्वेति
तत्रनिर्णीतत्वादितिबोध्यं॥ वाचकलोपार्थीयथाममजलदोदरान्तुदीताभामितिसौदामिनीसेवानीलनिवोलादा
विर्भूताकांतिश्चतेसमारभ्या॥ अत्रसमप्रयोगादार्थीसमासेश्रौतीयथा आविर्भवंतीप्रथमंप्रियायाःसोच्छ्वासमंतः
करणंकरोति संतापदत्यस्याशिशिरांशुमूनोःहृष्टेःपुरस्तादविरप्रभेव॥ अत्रइयंहीतिस्तवैशेषात्कामंदकीउपमेया अवि
रप्रभेवेत्यत्रइवेनसहसमासः आर्थीयथाममधृतीतांसंदेहेवद्वविशदयंतीदशादिशोहरंतीसंतापमनुपगतवती
सर्पाविषयं॥ मयानास्तकंदंष्ट्रामाधिमपादीपितिकात्वासमानेयंकेषांनहृदनिमनस्तेतनुलता॥ अत्रसमानपद
प्रयोगात्तस्यसमासांतर्गतत्वात्तस्यसमासांतर्गतत्वाच्च तद्धितेश्रौतीयथाममसुकुमारत्वमहणनाहशोर्वधीका

रकारणत्वेव भाति स्वमनकाग्निनिपाणिग्रहेतामरसवते अत्र इवार्थे सप्तम्यर्थे वतिः षष्ठ्यर्थे तत्रैव यथा मम
मेघवदियं केशकलापसंततिच्छाया संतर्पितजननयनानि रयति संतापसंतानं मे चस्येवेति षष्ठ्यर्थे वतिः वेदे प्रिय
या प्रियमेधवदत्रिवज्जातवेदो विरूपवत् अंगिरस्वन्महीव्रत प्रस्कएवस्य श्रुधी हवं प्रियमेधस्येवेति वतिः एतेषां
ऋषीणामाह्वानं यथा त्वया कृतं तथा प्रस्कएवस्य मुनेः शृणु इत्यर्थः आर्थी यथा मम उन्नमानतिकठिनः समुदित
नतत्रमालोपं बालेपयोधरस्तवकनकाचलवद्दीवर्तिः इह तुल्यार्थे वतिः ९ तदेवं षड्विधा पूर्णा व्याख्याता अत्रेदं चिं
त्यते चित्रकाव्यमिदं निरूप्यं तत्राव्यंग्यपरादित्वेन सति यदुक्तं प्राक् चित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृतमिति अस्ति चोदा
हृते सर्वत्र व्यंग्यमिति तत्राह रसादिरूपं व्यंग्यं सर्वत्रास्तीति तस्याविवक्षणीयसंधितया तदनादरेणैव उपमादय उ
दाह्रियन्ते व्यंग्यबोधात्मनश्चमत्कारः किं तु वाच्यवैचित्र्यादेवेति केचित् तात्पर्यविषयव्यंग्यपराद्दितमेव चित्रत्वं तत्र
तं रसभावादिविषयविवक्षाविरहे सति अलंकारनिबंधो यः स चित्रविषयो मतस्तत्राह अत्र लक्ष्माणि रूप्यते अन्यतम
स्य वर्णाविरहे लक्ष्मां वदंत्याममाः २ चतुर्णामुपमानोपमेयवाचकधर्माणामन्यतमस्य प्रयोगे तूपमा सा वत्रिधा
संभवति एकलोपे द्विलोपे त्रिलोपे वेत्यर्थः तत्र विशेषमाह अन्यतमस्य लोपे वास्त्यधर्मोपमानानां धर्मोपमानकयो वा
कं समयोधर्मोपमानयोः समासेषां ४ अत्र सर्वाईदेकलक्ष्मा घास्त्रयो भेदाः वाचकलोपे धर्मलोपे उपमानलोपे चेत्यर्थः

अ॰ कौ॰ उत्तरार्द्धे षष्ठ्यन्तत्रयेऽपि लोपे इत्यस्यानुषङ्गः सामान्यधर्मवाचकयोः वाचकोपमेययोः धर्मोपमानयोश्च लोपात् द्विलोपा त्रि-
३१ लोपेत्यर्थः समासेषां उपमानभिन्नानां त्रयाणां उपमेयधर्मवाचकानां लोपे त्रिलोपा एकविधेत्यर्थः समासेष्वामित्य-
30 त्र समासपदं साट पूर्णमति योगिपदं मत्तोकमलेनतद्रुदानाद धर्मविलुप्तश्रौतार्थी हृतो वाक्ये च तद्धिते त्वार्थी अस्यार्थः वाक्ये स-
मासे च श्रौत्यार्थीभेदेन चत्वारः तद्धिते त्वार्थ्येवेति धर्मलुप्तायाः पंचभेदाः ननु तद्धिते श्रौती धर्मलुप्ता कुतो नोक्तेति
चेत् न तत्र तस्यैवेति सूत्रेण विहितस्य वतेः प्रयोगात् तद्धिते श्रौती संभवति न च तत्र धर्मलोपः संभवति उपमेयेउ-
पमानसंबंधबोधकस्य तस्य साधारणधर्मप्रयोगं विना नुपपत्तेः न हि मथुरायामिव मथुरावत्स्रुघ्ने इति संभवति स-
मम्यर्थोपपन्नत्वयापत्तेः किंतु मथुरावत्स्रुघ्ने इति नैव तस्मात् षष्ठ्यर्थसंबंधाविशेषणस्य समर्थ्यधारत्वविशेषणस्य
साधारणधर्मरूपस्य प्रयोगं विना इवार्थवतेरसंभवात् तद्धिते श्रौती धर्मलुप्ता न तु मा भूदिवार्थकवतियोगो धर्मे लु-
प्ताश्रौती तथापि इवार्थकतद्धितांतरेसा दुर्वारा तथा हि इवे प्रतिकृतौ विषयिकारे कुशाग्रात् छ इति सूत्रेण कुशा-
यमिव कुशाग्रीया बुद्धिरिति प्रकृतप्रत्ययविधानेन एतादृशस्थले तत्संभवादिति चेत् अत्राहुः इवे प्रतिकृताविति विषयिका-
रे विहिताः प्रत्ययास्तत्सादृश्यार्थ एव कुशाग्रतुल्या बुद्धिरिति निष्प्रभेदात्पदार्थावबोधात् तस्य सादृश्यमात्रार्थत्वेन तत्व-
त्वाभावेनोपमेयसामानाधिकरण्यासंभवात् न च इवार्थे तद्विधानविरोधः प्रसंग इति वाच्यं सादृश्यविधानस्यापि

सदृशो धर्मो यस्य तेनेत्यभिप्रायेण सूत्रे इवार्थे तद्विधानेन न तद्विरोधादिति अथ सादृश्यादिपदयोगे श्रौत्यार्थी वा यथा
परस्परादिसादृश्यमुद्धरोज्जिनवल्लीसु मृगदृंदेहेषु पंपश्यं स्यौसंदनायद्वन्दृष्टिषु इत्याद्याविति चेत्‌ अत्र दीक्षिताः श्रौत्येवे
यं यत्र प्रत्ययप्रकृतिभूतेन सदृशाद्याहेन सादिपदवदभिधानेपि भावप्रत्ययस्य प्रकृत्यर्थतावच्छेदकधर्मतयातद्रूपतो
सादृश्यस्यैव वाक्यार्थत्वाद्वयित्यादिष्वाहुः न्यायचं पंचाननादयस्तु यत्तदाथविशेषणत्वोपमानत्वनियमस्तत्रैव श्रौती
इवादिविशेषणत्वेभूतस्य चंद्रादेरुपमानत्वनियमात्‌ सादृश्यादिपदविशेषणस्यैव तत्रोपमानत्वनियमः चंद्रसादृश्य
मित्यादौ तथात्वेपि चंद्रमुखयोः सादृश्यमित्यादौ व्यभिचारादित्याहुः नतस्माद्धर्मलुप्तायाः पंचभेदास्थिताः अत्र दीक्षि
ताः द्विर्भावेपि धर्मलुप्ता सादृश्यपन्ने यथा पटुपटुरिति प्रकारे गुणवचनस्येति सूत्रेण सादृश्ये द्विर्भावविधानात्‌ पटुस
दृशाद्यर्थः वस्तुतो पटावयं प्रयोगः न चेयं वाक्यगा कर्मधारयवद्भूतेरेषितिसूत्रेण तत्रैकपदविधानात्‌ नापि समा
समासगा वास्तवसमासत्वाभावादिति तत्र आतिदेशिकसमाससाधारण्येनैवात्र उपमाविभागकरणात्‌ आतिदेशिक
कर्मधारयवद्भावेपि समासगतायामेव तदंतर्भावसंभवात्‌ अत एव पटुपटुरित्यादौ समासत्वप्रयुक्ताः सुब्वद्भावाने
दानत्वादयोपि सिद्ध्यंतीति केचित्तु वाचकधर्मलुप्तायां यत्तद्भेदस्याधिक्यं न तु केवलधर्मलुप्तायां न चात्र द्विर्भावस्य सा
दृश्यवाचकस्य सत्त्वान्न वाचकलोप इति वाच्यं सादृश्ये योग्ये द्विर्भवत इति निर्देशात्‌ द्विर्भावस्य वाचकताया भाष्यकैयट

विरुद्धत्वादित्याहुः तत्र द्योतकत्वेपि उभयत्र समत्वासंभवात् अन्यथा इवादीनां द्योतकत्वपक्षे चंद्र इवेत्यादावपि लुप्तो
पमात्वप्रसंगात् परं तु केणातादृशार्थबोधे सहकारित्वं तूपमाया द्योतकस्य सत्वे तद्वाचकत्वस्य पदांतरे स्वीकारस्यावश्यक
त्वाच्च यदीयमेकत्वमायदिवादिलुप्ता उभयथापि समासमर्थे न भीवात्र कोपि दोष इति तत्वं तत्र वाक्ये श्रौती धर्मलु
प्ता यथा मम आलोक्य चंद्रमसमिमं वरवर्णिनि नायकं वदनं ॥ समभवंति मनसि केषां व्यापाराः पंचबाणीयाः अत्र मुखचंद्र
योरुपमायां साधारणधर्मस्याप्रयोगात्तस्य लोपः न च तादृशस्य लेसाधारणधर्मस्य इवशब्देनैवोपस्थितिरिति साम्याभिधा
नात्कथमेतदिति वाच्यं तत्र धर्मत्वेनैव तद्धर्मोपस्थितेर्व्यवस्थापितत्वेन आह्लादकत्वादिना तद्रूपेणाधर्मानुपस्थितेरनु
पपत्त्यभावात् अत एव चंद्र इव मुखमिति समासात्सुखमाह्लादकं न वेति संशयो न निवर्तत इति बोध्यं अत एव न तत्रत्यकारेण
वधर्मोपस्थितिं वदंतो ग्रंथकृद्भिः साराणामभिज्ञा इति बोध्यं आर्थी यथा मम मन्मथकालनजनीकरमंद्र केन तत्र लेन सदृक्षिकपो
लतलद्वयेन उन्मज्जतामहकृतसंततिमंजरीणां त्वव्याजयस्य दद्धश्यतरसकस्य ॥ समासे श्रौती धर्मलुप्ता यथा लद्धा
साधारणाचिवंसह विदिपविराहेणीसा अरवइणा सीआरकचेमवसंईरिहिसद्धवं विसेसरदिद्धउअणीआ ॥ अत्र सीतावि
षोद्यत्योः साधर्म्यमनुपात्तमर्थगम्यं आर्थी यथा आयादक्षिवरग्घुवरडवेइदिअ आम्मि अणीआ अरामंचो अप्रकवोल
सरिसाइपादिआमडउप्फाइं ॥ अत्र सज्जायाकपोलसदृशानीति समासः सदृशपदप्रयोगादार्थी न द्वितीयार्थीय

मेलुप्ता यथाननं मृगदृशस्तत्कृतिकल्पकपोलदेशो मकुरवेषाः तस्मादंशाक्षिप्तासाः कुवलयदलदामदेशीयाः तेनात्र
लुप्तमिति विदितं विति प्रयोगे तत्रुप्रमिलुप्तानसंभवति तस्य क्रियासाम्ये विधानेन क्रियारूपसाधारणधर्मप्रयोगं विनानुपप
त्तेः॥ अथोपमानलुप्तामाह वाक्यसमासोभयगोपमानलोपइति वाक्ये समासे च उपमानलुप्तेत्यर्थः ननु तद्धितेपि व
त्यादेस्तद्धितस्योपमानवाचकपदान्तरमेव विधानेन उपमानानुपादाने तदसंभवात् नापि श्रौतीयं इवादिपदानामनु
पमानानंतर्यनियमेन उपमानपदं विनाऽन्वयाबोधकत्वात् अतश्चार्थीद्विविधैवेयं तत्र वाक्ये यथा सअलकरणपर
वीसामसिरिवियरणं ण सरसकव्वस्स दीसइ अहव णिसम्मइ सरिसं अंसंसमेत्तेण॥ अत्रैव कव्वस्स इत्यत्र कव्वसममिति स
रिसंमेत्त—णमिति पाठे च समासगेति काव्यप्रकाशकृत् नन्वयं कथमुपमानलुप्ता चंद्रस्य सदृशमित्यत्र चंद्रस्येवोप
मानताप्रतीतेः काव्यस्य सदृशमित्यत्रापि काव्यमेवोपमानमिति चेत् अत्राहुः काव्यस्य सदृशमित्यस्य काव्यप्रतियोगि
कसादृश्यान्वयोगीति नार्थः किंतु काव्यनिष्ठसादृश्यप्रतियोगीत्येव काव्यस्य प्रकृततया तन्निष्ठोपमेयत्वस्यैव
वक्तितत्वात् अथैवं न ह्रतिसादृश्यप्रतियोगिनोऽसत्वेनान्वयः स्यात् किंच भेदगर्भसादृश्यस्याप्रसिद्धतया कथं नि
षेधः नचात्र भेदगर्भसादृश्यं स्वस्मिन्नेव प्रसिद्धमिति वाच्यं उपमेयस्य स्वस्मिन्नवविरोधादिति चेत् न दर्शनश्रवणविषयतया
उत्कृष्टगुणस्योपमानत्वविवक्षणात् दर्शनश्रवणविषयस्यैवोपमानत्वनिषेधात् अतोत्रानुपादानमात्रं उपमानस्य वि

वर्तितं न तु वस्तुतोप्यसत्वं अनन्वयेत्वसत्वमेवाभिमतमिति अन्ये तु सदृशपदमत्रोपमानेतरलक्षणिकं न चैवं तद
नुपादानं नास्तीति वाच्यं यादृशपदे वोपादानोपादाने तद्वृत्तवर्तिना इवादिपदेन उपमानत्वं बोध्यते तादृशपदेनानु
पादानेऽन्यर्थात् न च सदृशादिपदेन उपमानोपादाने तद्वृत्तत्वं इवादेः संभवः न चात्रोक्तरीत्या सदृशपदस्योपमानप
रत्वे सादृश्यैकपदाभावेन दिलमत्वं स्यादिति वाच्यं सादृश्यप्रतियोगित्वस्योपमानपदार्थतया सदृशपदस्यैव सादृश्या
र्थकत्वात् न च सादृश्यप्रतियोगितावच्छेदकस्योपमानत्वस्य सदृशपदार्थत्वे श्रौतत्वं स्यादिति वाच्यं उपमानविशेषाभ्र
न्तायाएव प्रतियोगितायाउपमानत्वात् प्रकृते च पदार्थतावच्छेदकतया तस्याउपमानेऽपोषणत्वात् सदृशपद
स्योपमानेतरलक्षणिकत्वे न श्रौतत्वाभावाद्वेति वाच्यम् ॥ काव्यप्रदीपकारस्तु चिंत्यमेवैतदित्याह तस्योपमानाया
प्रकृततया काव्यस्यैवोपमेयत्वमुत्कर्षायेत्यसंगतं स्वनिष्ठसादृश्यप्रतियोगिनिषेधस्यैव स्वप्रतियोगिकसादृश्यानु
योगिनिषेधस्योत्कर्षपर्यवसायित्वात् यथा रंतासीति पुरापि संस्पृष्टम देवी रस्तु कतासादृश्योयोजनागतिजनाद्य
यी विपदलंकर्मीणदोर्विक्रमः शम्भुद्वासम्भु विप्रशास्ति रवणवर्णायमानस्तेरणोश्रेणीसंभूतगोत्रभिन्मयनयस्त
भोयथारावणः ॥ अत्र हि रावणसदृशस्याश्रवणोक्तायथोक्तार्थलाभः यथा वा अस्मिन्वक्षोपि परापकृतो ह्यकृतीन
दृष्टो न च मन्मथ्युभवेऽस्य त्र प्रकृतः कामः तथा च कामप्रतियोगिकसादृश्यनाचो मोदरीनस्य वर्णविषयोत्वा

भाववानितिवोधः एवंचेदेपि इंद्राणीमात्सुनारीषु सुभगामहमस्मृवं नसत्स्या अपरंचनेत्यत्र तत्वास्या अपरांसमामि
तिनिरुक्तकारोक्तेः इंद्राणीसमांनान्यांप्रश्नमित्यत्रापि इंद्राणीप्रतियोगिकसादृश्याश्रयनारीविषयकज्ञानाभाववानहमि
त्यवार्थः अथकथंचित्तवाचिकामहृतिसादृश्यप्रतियोगिन्योदर्शनीयविषयइति वोस्तीकुर्यः तर्हिइवादिपदानामु
पमानस्योत्तरमेवप्रयोगाइतिनियमव्याघातापत्तिः प्रोत्पाश्रयुपमानलमायाः सहृत्तेसंभवेनग्राथीवेतिनियम
स्तत्तिश्च इवादिपदानांयदन्तरंप्रयोगस्तस्यैवोपमानताधीरितिनियमभंगस्येतिदिक ॥ अतएवढुंढोल्लंतोमवि
हसेतिवर्तमानेनात्रोपमानलोपइत्यलंकाररत्नाकरः एतेनतत्रोपमानस्यासत्त्वेनाभिमतत्वमपित्वपास्तमितिवेदु
पमानलोपएवेतितदुक्ततरंसंगंगाधरहृषणमयात्त उक्तरीत्यैतत्राभिसंधानात् तस्मादेतदुदाहरणीयं चंद
मरिसंसुदंसेसरिसोअमअस्समुद्दरसोत्तिस्सा सकआगाढरदसाअलबुधणीकस्ससरिसंसे ॥ अत्रमकवअ
इरभसद्दढंचुंवनंकससहृणामितिउपमानस्यअप्रयोगः समासेयथा पतलनामपिरोहसिलोकोनरवणी
परिमलोद्गारैः कुसुमकुलतिलकचंपकनवसंतं जातज्ञानीयः द्विविधेयमितिप्राचीनानुसाराइकै वस्तुतस्तु
उपमानलुप्तानहितेपिसंभवति यथाधंवत्कः हृद्दत्कइति तथाचकैयटः अवंवनपियस्मांचाविवलतेतिसवं
वत्कः यथामणिःस्पंदमानप्रभवत्वात् अहदत्रपिहृदश्रिपिवग्रस्तनप्रभत्वाद्योदृष्यतेसहृदत्तकइति अत्रविदिवं

ग्रं॰कौ॰ वतेन्द्रत्वं च धर्मः माणवादिरुपमेयः कनकमत्ययस्य वा वाचकः यंचत्वाद्याश्रयस्य वा प्रयोगः न चैवं उक्तमेव तः स्रगोपां च वृत्ता
३३ द्यभावात् साधारणधर्मस्योभयवृत्तावेवोपमास्वीकारात् तथा चायं मणिं च चत्वप्रकारकं संभावनाविषय इति वाच्यं ।
33 आरोपितेनापि चंचत्वेन साधारण्योपपत्तेः वास्तववृत्तित्वस्य चमत्कारितायामप्रयोजकत्वात् वस्तुतोस्मिन्नाव
शंकैव नास्ति तथा हि केन प्रकारेणेदं चव हृद्दतोरुपसंख्यानमिति वार्तिके इवेप्रतिकृताविति कन्ववसादृश्यार्थेप्य
वभवति अन्यथा चंचत्वादेनामपि उपमानत्वमसिद्धं स्यात् नाप्ययमेतिप्रायोक्तिरिति वाच्यं मणिपादौ प्रयोगसत्वात्
आयः शूलिक इत्यत्र टकप्रत्ययस्य दणाद्यर्थे अनुशासनाभावेन क्रूराणाद्युपमेयप्रयोगाभावेन च तथात्वस्वी
कारात् रामक इत्यादीनामप्युपमानत्वोच्छेदप्रसंगाच्च प्रकृते प्रकृत्यर्थे प्रत्ययविधायकेनानुशासनेन सादृश्यार्थे
एव तद्विधानाच्च अन्यथा सर्वत्राप्यवस्थापत्तावुन्मत्तकलहः स्यादिति दिक् ॥ अथ वाचकलुप्तामाह तद्वाक्याज्ज
कलुप् द्योतकलुप्तोपमावाक्ये तद्धितेनैव न संभवति स्वरूवं चं द्रोरमणीयमित्यतः सादृश्यप्रतीतेः कस्य चाद्यर्थाद्योत
कतया तत्र प्रयोगे द्योतकलोपस्यैवासंभवात् वाक्यपदं तद्धितस्याप्युपलक्षणमित्यर्थः अत एव तदुद्देश्यत्वादत्र सुखे
न उक्तार्थं दर्शयति इहैव कर्माधारक्यचि क्यङि स्यात् तद्विधाणमुलि इहैव समासे कर्मक्यचि आधारक्यचि क्यङि कर्म
णामुलि कर्तृणामुलि चेति षड्विधेत्यर्थः तत्र समासे यथा दीर्घ इति उत्पर्यंच लिसिंहदारुणागाइंद्रकुंभकाश्च संदरथा

ऽकलंकिच्चवासहमंडलगणश्रकलंकइविंब॥ इह विद्रुमवनाम्बमिति उपमानानि सामान्यवचनैरिति समासः
उपमावाचकस्य समासांतर्गतत्वात् अप्रयोगः अत्रोपमानधर्मयोः समासः क्वचित्त्रयाणामपि यथा जितमि
दम्भवने त्वया यदस्याः सगविधकुलावलिवल्लभासि जाता परिणतविसकांडपांडुमुग्धस्तनपरिणाहविलासवै
नयंती अत्र विसकांडमुपमानं पांडुत्वं साधारणधर्मः स्तनउपमेय इति त्रयाणां समासः यत्तु कोकिलालापिनीत्य
त्र कोकिलवदालपनीमर्थे कर्तर्युपमान इति सूत्रेण णिनिप्रत्यये वाचकलुप्तोदाहृता तथा च चित्रमीमांसायां
समासोक्तः पापप्रदीपक दृष्टिं समयदितिमनसिजः कीटमार्गसनयः स्वांते योतः द्युतिपसन्निभजनस्य
वस्ते कुमारीयतिदाकमेलस्तंभायते यत्रिभुवनभवने कोकिलायितीं दावामंगीकस्य वलीमथयति कु
वलयश्यामलां तां भजामि इति तत्र उपपदमतिङिति समस्तस्य तत्रापि सद्भावेन समासगणनेनैव तत्कोशिका
रान् विभाजकतावच्छेदकधर्मेन वाच्छितत्र पदार्थिक्यस्योद्भावयितुमवितत्वात् न चैवं वत्यादीनामपि तद्वि
तत्वादिना विभागेनानुगमापत्तिरिति वाच्यं दृष्टापत्तेः विभागसौष्ठिकत्वात् इमानेवाद्दिविशेषः तद्धितत्वसाता
द्विभाजकोपाधौ यत्नित्वादपरस्तत्परंपरया विभाजकाः वतित्वादिनैव विभागेन तत्तयेव विभाजकोपाधय इति
किं तत्समासत्वमेव विभाजकतावच्छेदकं पदत्वाकर्थतदवच्छिन्नस्य लुप्तवाच्यमिति रूढा व्यत इति तचेनमेतद्

शृं·कौ·
२५
34

त्रीयपां दृश्यं न विस्मरति ॥ कर्मक्यविषयामम वर्मीगामापगामकालसमन्त्रकानां हंसमंडलीमयदिंदंशिकवद्धि
पूर्णा कादं विनीयति नन्दूर चुनंदनस्य सौदामिनीयति मुदा मनं केंद कन्या अत्रोभयत्र उपमानादाचारइति कर्मणि
क्यच् अधिकरणक्यविषयामम भूयरीयति पयोधरद्वये वंहमस्यति चुवितवास्य हक विद्रुमीयति रदच्छदांतरे
दर्पणीयति कपोलमंडली इत्यत्र अधिकरणाच्चेति अधिकरणात्क्यच् भूपरीश्वाचरतीत्यादिरर्थः अत्राचारः प्रत
यार्थः अप्पादत्तनसारइवपदस्य क्वडि पयोत्यादि वदस्फरकनायते मत्तगतिवातापि वज्रायते मालंस्तविकुलायते
मलयजायसि स्फुटि ·· · [illegible] मिनायते विधिवशात्प्राणोऽपि भारायते हा हंत प्रमदावियोगश्य
मयशिंसारकालायते ·· · [illegible] कर्तृक्यङ् सलोपश्च अत्र च न उपमानादारेकीर्त्तिनि किंतु भवति उ
पमानवाचकपदस्य सत्ता नहि मन्तुनितं न हूनितं वार्थः अथाचमेघभिन्न हूनिमेघ हूनिश्री रामविषयका चा
रात्वहूलहूतिमाश्रयइत्यर्थः प्रत्ययार्थे इवार्थस्य च हूनितं माचारे प्रत्ययार्थेऽन्वय इति पर्यवसितं न च तदुक्तं प्रत
यार्थानन्वितस्य प्रकृत्यर्थस्य अत्र यत्रान्वयासंभवात् प्रत्ययार्थे प्रकृत्यर्थभिन्नस्यान्वयविरहाच्चेति चेन्न उक्तस्थले उ
पमानादिति वचनसामर्थ्यात् इवार्थविशेषणीभूतस्य प्रकृत्यर्थस्यान्वयाभ्युपगमात् आख्यातार्थकृतौ तदर्थवर्ति
मानत्वात्तयेन द्वितीयतिपमाभावाच्च अत्रवदंति पौरंदरीयतीत्यादौ क्यवादीनां माचारमात्रार्थत्वे सत्तादान्विते आ

वारेयोरादिकर्मिकत्वात्तयासंभवात् नच सत्ताद्यनवच्छिन्नैव आचारस्य पौराद्यन्वय इति वाच्यं अकर्मकस्यार्थानन्वितमत्य
यार्थबोधात् अन्यथा चैत्रो न पचतीत्यस्यापि पचनत्वेन चैत्रः पचतीति वाक्यात् चैत्रः कृतिमानिति बोधापत्तेः किं च अस्तु तस्य
इत्यादिप्रयोगस्य कल्पनापि तया कान्तादिप्रासिकल्पनमेव युक्तं अन्यथा एवं सम्प्रतिपादनेन रघोक्त्यादिप्रामाणिकविलोपापत्तेः
तत्रापि इङ्कतीत्यादेरथाद्यारसंभवात् अथ तत्रानुशासनबलाध्वनापि याद्यर्थबोधात्त्वप्रामाणिकीति चेत् क्यजादाव
पि समानं अतः क्वचिदाचारजातीयाचारोऽभेदश्चार्थः अतएव सत्तं सतीयतीत्यादिर्न प्रयोगः तथा च पौरं सतीयतीत्या
दे सत्तभिन्नपौरवृत्तिर्यः सताचारजातीयाचारस्तदनुकूलकृतिमानित्यादिरर्थः एवं च सत्तपौरादेः साधारणवि
शेष्यकबोधात् श्रौतीसरणिमपमेवं यं न तद्वाचकत्वमिति तत्र सत्तमित्राचरतीत्यादिविवरणाज्जबोधेन इत्यादिक
ल्पनस्याप्रामाणिकत्वात् आचारे वा चैव उपमानवाचकपदात् क्यच्प्रत्ययो भवतीत्येवानुशासनार्थः सच इवाद्यर्थाद्द्वारेऽपि
विरुद्धः नहि सन्नमत्ययमस्हृकायां विधानवत्त्ववचोऽपि भेदादौ शक्तिरित्यर्थो नुशासनादृश्यते येन तत्र शक्तिः स्या
त् अतः क्यजादेः साधारणधर्ममात्रार्थत्वात् द्योतकत्वमेवं इवार्थमिति दिक् यदप्येतदर्थिक्लृप्तं चन्द्रीदासादय
आहुः नक्षत्रीयतेत्यादौ कण्ठमौपम्यप्रतिपादकं प्रयोगाभावाच्चन्द्रादीनामेव तदर्थविहितत्वयान्तत्कर्मत्व
त्वात् अथैषां प्रत्ययत्वेनास्वतन्त्रतया प्रयोगाभावेन तद्वातन्त्र्यमौपम्यप्रतीतिरिति तर्हि इवतिकसत्वादावपि तथै

श्रं॰कौ॰ वमसज्जेत न हि मन्मथतयात हि तान्ययोः कश्चन विशेषः कल्पवादयइवादित्वलत तयोपम्यस्यवाचकाः क्यङाद
३९ यस्तु योतकाएवेत्यपिच इवादीनामपिवाचकत्वसंदेहात् अस्तु वातेषां वाचकत्वं तथापिसमुदितमेववाच
कंपदं म कल्पमतियो स्वस्वार्थवाचकाव्यतिमत हयेपिवत्याधिकयङादयोः साम्यमेवसत्यमेवं तथापिप्राचीनोपदे
यनियं त्रितोयस्याचार्यः उपरोधानकृतव्यइत्याभाषणं विवानयीढशानि उपेक्षः पांकु संचितानि संकदानि भवि
शतीप्रमत्र किं ब्रूमः यत्तु केनचिदुक्तं वत्यादयइवाद्यर्थे नुशिष्यं नेकिङादयस्तथाचाइति वैषम्यमिति यतदप्य
दिक्षतं नहि किङादयस्त्राचार्यमाचार्याः किंतुमहाभाष्याचार्यौ इति तदप्यनतयपरास्तं सहजाचारस्यक्यङाद्य
र्थत्वकल्पने प्रमाणाभावात् अपिच उपमानादाचारे इति ह्यधिकारः उपमानार्थकपदोत्तरं आचारार्थे क्यङादयो भव
न्तीति सूत्रान्तरैकवाक्यतयार्थः तथाच यदि इवाद्युपादानेन क्यङ्क्रियेत तदा प्रकृतेरुपमानार्थकत्वमेव न स्यादि
ति जङ्घनस्क्यङादयएव उल्लभाः स्युरिति क्यङादीनामुपमानपरत्वनियमस्तु तस्मात् तेषां श्रवणमात्रेणौपम्यस्य
न वाचकस्यैवादेर्वृत्तिप्रसङ्गाभावात् अत एव यं श्योतेव वयजादेरुपमानोत्तरत्वनियमादिति न्यायपंचाननादयः
प्रकृत्यैव लक्षणया प्रतिमतिमतेनेदं समुदायस्यैव तत्सदृशाचरणकर्तृत्वशक्तत्वमिति न येनापि सादृश्य
सादृश्यप्रकारोपि सन्नरमात्रवाचकपदाभावाद्वाचकत्वमिति केचित् तदसत् किंपेपुभयप्रलयोदाहरणात्

पद्यते तत्रापि प्रकृतेः सादृश्यैकलक्षणासंभवात् अत एव तद्वाचकस्येवादेर्विलोपलंभात्वादिस्तत्रैव न्यायपंचाननादि
भिः क्यङादीनां वाचकधर्ममात्रलुप्तोदाहरणविरोधाच्च यथाहि सादृश्यमात्रवाचकत्वाभावान्न तल्लोपः तथा चा
रादिमात्रवाचकत्वाभावान्न तल्लोपः तस्यापि सर्ववत्यादिनिषेधं उपमानोपमेयनिष्ठसदृशधर्मस्योपमाप्रयोजकत्वात्
तत्प्रयोजकस्योपमानोपमेययोः संबंधस्य सादृश्यस्य ततोऽन्यत्वात् तद्वाचकत्वं क्यङादीनामिति चक्रवर्तिनः अत्रा
पि साधर्म्यातिरिक्तसाम्यरूपः संबंधोऽभिधेय इति न्यायपंचाननः उभयनिष्ठसमानधर्मबुद्धिग्राह्यस्य सादृश्यपदा
र्थांतरमिति भिन्नाभिप्रायेण चक्रवर्तिनामुक्तिरिति तत्त्वम् ॥ कर्मार्थकणमुलि यथा मम सांवर्तिकतीव्रणद्युतिदर्शं
पश्यति स्म पापं बालाविरहेण निधिनिधायं निपदातिस्तनगतं नगांकं ते ॥ अत्रोभयत्राप्युपमानात्कर्मणि चेति सू
त्रेण णमुल् णमुलप्रकृतिभूतस्येव धातोराख्यातान्तस्यानप्रयोगोऽनुशासनसामर्थ्यात् पूर्ववदेवात्रेवादेरप्याहा
रः यत्तु भेदासजातीयस्य णमुलोऽर्थः भेदः सकर्मकक्रियायोगे कर्मणि अन्यत्र सजातीयक्रियाकर्तर्यन्येति तथा
चक्रधेति दाघ घर्माभ्रुदर्शं पश्यंतीति न परे इत्यसनिदाघघर्मांशुभिन्नतत्कर्मकं पयनिदाघघर्मांशुदर्शनसजाती
यदर्शनं तद्वन्तः परे इत्यर्थः स पुनः पान्थसंचारसंचरत्पवतीयतीति इत्यत्र त्वपान्थभिन्नत्वे सति पान्थसंचारसजाती
यसंचारवानिति तदर्थः अत एव घर्मांशुदर्शं घर्मांशुं पश्यंति पान्थसंचारं पान्थाः संचारन्तीत्यादिर्न प्रयोगोऽनः स्वर्णां पभे

श॰कौ॰ वेषमिति तन्न भेदादौ णमुल्लक्षणाकिबोधकान्तरासनाभावात् किंच अन्वयितावच्छेदकावच्छिन्नप्रतियोगितावच्छेद-
२१ कत्वसंबंधेन प्रकृत्यर्थस्य मदानयोन नियतः देशकालादिकृतभेदविवक्षया तथा प्रयोगस्यापिष्टत्वात् लंका-
37 पुरादन्तितरां कुपितः फणिपनिर्गत्याया त्पहननापतिभिः परीतः कुवरंणेन परिदाशरथिं दशास्यः संबंधांटचा-
रथिदर्शमहो ददर्श त्यननत्वपालंकाश्भेदस्यात्प्रतीत्यानभेदविषाकौ प्रमाणमस्ति नवत्र प्रभेदस्यानन्वयषष्ठे-
तिवाच्यं प्रत्ययार्थत्वकल्पनात्तदनन्वयकल्पनाया अनौचित्यात् अन्यथा स्तौति कृतिके चैत्रे चैत्रः पचतीति
प्रयोगापत्तेः वर्त्तमानस्य कृतावनन्वयात् अन्यथा तद्धटकपदार्थेषु खंडशाकौ प्रमाणशाब्दस्य शाब्दबोधसंभवे
महिरोधात् अत्रापि लक्षणावास्तकोदोषइति चेत् श्रोतात्वावपपत्तिरेवेति दिक्॥ कर्तरि णमुलिथंद्यात्वद्दि प्रयो-
गदहनवद्दमाने ये ये गुणाहृदि वसंति सरोरुहाक्ष्याः ते वद्धिमध्यविलसद्विमतत्तुनाशं नष्टाः स्वपाप्यति वि-
वेकमुखाः समस्ताः॥ अत्र प्राग्युक्तस्य पचकारेणाकर्त्तरि वत्तु कथं तत्कर्तरि णमुल् एवं च यादृशाविधेकमस्माख्या-
ख्याता अथादिलमाख्याख्यायते धर्मयानकल्पफिस्समासयोरिति नदीयवाक्ये सम्भवति मृतचंद्रइत्यतः सा ह्य-
पणप्रतीतः नद्दितद्धितगावत्वादेरेववाचकत्वेन नाम्नो याभावात् तत्रफिपियथा मम वाणांतिवाणाधाराः पवा-
नाः पवयंति वह्नयंति विद्युत् घननिधनायनमालापाथिकानां कामनुन्नानां सर्वथानिपदिकेभ्य आचारेक्विप्त्र

र्थे इति भाष्यकारवचनाद्धाराद्वाचरंतीत्यादावर्थे क्विप् तस्याचानार्थकतायामपि सर्वलोपिनेत्यामुपमानलोपाद्उ
पमेयलोपाच्च व्यवहारः इवाद्यप्रयोगस्तु स्पष्ट एव वा समासे यथा अयं कश्चन्मनिवारकाणां गिरा विभर्द्द्यदि विधुनकंर
दर्पाद्दैविस्मयनिस्तरंगां सालं त्विनायामपि राजसिंहः अत्र राजा सिंह इवेत्युपमितसमासः न चात्र सिंहशब्द
देव्याघ्रपुंगवर्षभकुंजराः सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचका इति सिंहपदं श्रेष्ठपरमिति वाच्यं केवलमी
दृशप्रयोगादवलोकनोपपत्तये उपमितसमासस्यैव युक्तत्वात् न चैवं सामान्यधर्मप्रयोगात्तत्समासानुपपत्तिरिति
वाच्यं तत्रोपमानिमित्तसामान्यधर्मप्रयोग एव समासनिषेधात् शौर्यादिदर्शनात्तत्र सिंहोपमायाः सिद्धायाः पश्चाद्वा
तत्प्रभावस्य तत्र वर्णनात् क्वचित्समासकल्पे उभे यमे यथोतनकंजौ लीकउपमावयम्य ये भवतीत्यर्थः यथा
मासंभावयमां गिरामधुरया कुर्यान वितोत्सवं वातांदोलविलोलपंकलदलशोदस्वशावाक्षशा अत्रयाते मणिपच्च
कारभवती हृत्सौचितीसम्भ्रमं ते नेवाद्यमर्मेज्जलंदरस्तविस्मान्मामदंशीयति ॥ अत्र मंदं हसितमिवात्मानमाचरतीत्य
र्थे क्यच् यद्यप्यात्मैवोपमेयस्तथापि कर्तृकर्मीभूतयोरुपाधिभेदेन व्यवस्तया कर्मीभूतस्यात्मनो उपमाणात्वाद
पमेयलोपव्यवहारः अत्र दीप्तिनाः धर्मवाचकस्य समानाद्विनापि संभवति यथा त्वत्ांयसेवमानानां संसारोप्यपवर्ग
ति तं प्रांसमे भुजभजन्मात्वर्थचाचंद्रकलाधरे अत्र हि चेचवचंवतिरवेभ्रतिकृताविति कल्पलुपमनुपपत्तिर्नसलो

ग्रं·कौ·
१८
38

पः लिंगं तत्र मक्तानि वदेव एवं वधिके व वधिके त्यादावपि अत्र हि साधारणधर्मस्याचेतनत्वादेवीचकस्य च लोपः स
त्यपवेत्याहुः अयेत्यत्र चन्द्रमौलिभजनतत्परादिस्त्र प्रथमप्रयोगाभावे तल्लोपः नयमस्य विशेषणत्वेनोपादानात्तस्योपमा
नभूतत्वं चायामनन्यथात्र साधारणधर्मानन्वयादिति वाच्यं यद्रक्तानां सुखमयासंमासेप्यपवर्गीति तं शंभुमभज
न्नर्थं चास्मान्मद्धिनाक्तेरित्यत्रापि धर्मत्वमत्वमसंयोगमत्र धर्मश्रवणमिति होक्तिविरोधापत्तेः उभयत्रशोक्ताव
यवोधाविनापि वस्तुतउभयहेतित्वज्ञानमेवसाधारणेपतिमामकमिति तत्रापि तत्वं उपमेयताच्छेदकतावच्छेदकत्वेनैवात्र
चन्द्रमौलिभजनरादिस्त्वविवक्षितं साधारणधर्मस्यात्मद्धिनाकरणमेवेति तत्रापष्यामात्र चन्द्र इव मुखं रम
णीयमित्यादावपि धर्मान्तरप्रयुक्तसादृश्यविवक्षितमित्यपाप्यस्यापि संभवाद्धर्मप्राप्तेरित्याहुः ॥
धर्मोपमानत्वमाहुतौ वाक्ये इति धर्मोपमानलुप्तासमासे वाक्ये चेत्यर्थः तद्धितेत्वनेयं संभवतीउपमानपद
तरमेवतद्विधानात् अतएव श्रौत्यापि उपमानपदाप्रयोगे एवादेनप्रयोगात् तत्र समासे यथा तुरङ्गोत्तमाम
सिद्धिसिकंटककलिग्राहकेभ्रद्वगणाःमालद्कुसुमसरिकं भमरभमंतोणपाविद्धिति ॥ अत्रापि माल
तीकुसुमसदृशामित्यस्य कुसुमनिष्ठसादृश्यप्रतियोगिनमित्यर्थः ॥ वाक्ये यथा यंतुत्वसदृशा [illegible]
श्रोसदृशंपयसे तां किंकृद्दउर्वीजंतुकसमानोपुवाणास्थि ॥ तन्निष्ठसादृश्यप्रतियोगिनामित्यर्थः यथा

१८

मालः कुसुमेणासरीसमिति पूर्वे लोकपादे समासगणो द्रष्टा ग्रन्थदीपितः वाचकोपमानत्वमास्वन्नपतयवानुरागेणैता॰
समासेप्यस्ति तथा धर्मोपमानत्वमाहुरिति वाक्ययोरेवोक्तानि हितेप्यस्ति तथाहि काकागमनमिव तालपतनमिव काकता
लं समासाच्चतद्विषयादिति समासाभावाभावेन प्रत्ययविधानाज्ज्ञापकात्समासः इवार्थविषयात्समासात्छप्रत्ययः स्यादि
ति हितरर्थः न च इवार्थे समासं विनानत्संभवतीति तस्मादेव तात्पर्यग्राहकात्समासः तत्र काकस्य हृत्तरागमेना
लश हृत्तत्पतनेवर्तते तत्र काकागमनं देवदत्तागमनस्योपमानं तालपतनं दस्यूपतिपातनस्य तयोरिव यो हृत्स्य का
कतालमिति समासे लोपः स्पष्टः ततोपि काकतालमिव काकतालीयमिति समासात् इवतद्विषयादिति छप्रत्ययः
तालपतनेन यथा काकवधस्तथा चौरैर्देवदत्तस्येति तद्धितार्थः तथा च काकतालीयपदे छप्रत्ययप्रकृतिभूतसमा
से वाचकोपमानलोपोस्ति परं तु प्रकृते तदनुत्पन्नमूलत्वप्रसंगः तत्समासस्य स्यात्तत्रैगाम्प्रयोगाभावात् तथाहि
छप्रत्ययविधानबलेन तत्र समाससिद्धावपि छप्रत्ययो विषयस्तत्रैव समासो न तत्र कप्रत्ययविधिस्तु केषि विभागश्चात्र सा
तं त्रैगाम्प्रयोगायोग्यानामेव कृत इति वस्तुतस्तु नात्र वाचकलोपोपि समासस्यैव वाचकस्य विद्यमानत्वात् इवार्थवि
षयकात्समासादिवार्थे छप्रत्ययविधानबलेनेवार्थप्रसमासस्य वाच्यत्वात् तथा च केयदेन व्याख्यातं काकस्या
गमनमिव चैत्रस्यागमनं तालस्य पतनमिव दस्योरुपनिपातनमित्येक इवार्थः तत्र समासः तेन पतनतालेन या॰

प

ग्रं·कौ·
२९
39

ण्या काकस्य वधस्तालपातस्याभिन्नत्रस्येति द्वितीयार्थः न च वक्तृप्रत्यय इति अत एवं वेदं तत्पदाभ्युपगंतव्यं अन्यथा इवार्थे विदि
तस्यान्तर्हितस्यापि तद्वाचकत्वमसंगादिति न तत्र एवं तद्धितार्थे भवतोपाधर्मोपमानलक्षणायाश्चापि विनाशोक्तिः तद्धितोत्पत्तिर्द्
ष्टायां काकतालपदस्य तालकाकेन तालवधैकाकवधे लक्षणाभ्युपगमेनास्वीकारेऽपि न तत्राप्यकाकतालपदस्य स्वरूपमात्रेणेनोपमान
लक्षणाभावात् न च लक्षणायां मानाभावः उपमानपरत्वाभावे तद्धितस्य इवार्थेन द्वितीयानुपपत्तेरेवमानत्वात् इति कृतपल्ल
वितेन अथात्रिलमामाह कृतोसमासलक्ष्यधर्मद्योतकोपमानानां लोपे समासप्रत्ययौ यथा अहह समरसंदतमंडलक
वालपदिमागाओमयअक्षीय अज्ञोसिं हरसमसंखवमकरणीवदहंचरो अत्र समासगेति इह हि सरसि असक्षतिणीइवालिणी
अस्याइवार्थे समसस्योपमानपूर्वपदो बहुव्रीहिरुत्तरपदलोपश्चेति वार्तिकात्समासः अस्यार्थो हि समसमोपूर्वपदस्य
उपमानपूर्वपदस्य च बहुव्रीहिर्वाच्यः उत्तरेषां इवपदोपमानार्थकसुबपदादीनां च लोप इत्यर्थे वार्तिकाव्यप्रदीपा
द्यः सर्वे व्याख्यातारः वस्तुतस्तु उत्तरपदशब्दस्य समासांत्यावयवे वृत्तिरिति वैयाकरणसंप्रदायात् उपमेयभूतमु
खपदस्यैवात्र लोपेन भाव्यमिति सुधीभिर्भावनीयं अतो धर्मद्योतकोपमेयलक्षणेऽपि पदलोपमिति प्रयुक्त कैयटस्याद अ
प्रयोगाद्यवाच्यलोपशब्देनोच्यते तथाहि उष्ट्रोमुखमस्या इत्येव विग्रहः न च प्राणिभिः प्राण्यंतरावयवोऽभवतीति उष्ट्रपद
स्य तन्मुखे लक्षणेति अस्मिंस्तु पक्षे नात्रोपमानादिलोपप्रसंग इति सर्वं कपदलोपे वदन्मदाहरणं बोध्यं ॥ अत्र केचि

२९

तदुपमानमात्रोपादानेपि विशेषः [illegible] संभवति यथायमायःशूलिक इति अयःशूलमिव तीक्ष्णश्चाचारः अ
यःशूलं तेनान्विच्छतीत्यायःशूलिकः अत्र हि उपमेयधर्मवाचकानां त्रयाणामपि लोपः अत्राहुः क्रूरस्याचारस्यायःशू
लतयाध्यवसानादतिशयोक्तेरेव विषयत्वादुपमाविरहात् अतएवमस्याभाष्यमपि अयःशूलमिवायःशूलो योमृ
दुनोपायेनान्वेष्टव्यानर्थान् रभसेनान्विच्छति स उच्यते आयःशूलिक इति कैयटश्चाह यथायःशूलं तीक्ष्णमेव
मन्येपि तीक्ष्णादुपायो यःशूलमिति उपचारादिति एवंएवं पार्श्वेनान्विच्छतीति पार्श्विक इत्यत्रापि तिशयोक्तिरेवप
यापार्श्वं तिर्यगवस्थानादनृजु तथात्वोऽनृजुरुपायः पार्श्वमिति कैयटव्याख्यानात् एवमेकोनविंशतिर्भेदाः
लुप्ता अत्र केचिदुपमाया भेदान्तराणि स्वीकुर्वन्ति ते च यद्यपि वैचित्र्याभावादुक्तभेदेष्वेवान्तर्भवन्ति तथाप्यवान्तर
वैचित्र्यसत्वात्सकारानुमननायोदाह्रियंते तथा च भरतः एकस्यैकेन सा कार्या देकस्य बहुभिस्तथा अनेकेषां तथै
केन बहूनां बहुभिस्तथा तत्रकं द्वितीयभेदमाह मालोपमोपमेये यत्रैकस्मिन्बहूपमानसंबंधः सामान्यधर्मा-
भेदाभेदाभ्यां सापि द्वेधा तत्र साधारणनिमित्तधर्माभेदे मालोपमा यथा गेहंव वित्तरहिअं धणरहिउ अह जणगे ह
वासो व्वतिउ व्व हिदसणं विअ रसमहणिज्जो तहहविओ अत्रउःसदृशं सर्वत्रैको धर्मः श्रूयमाणः तद्भेदे यथा मा
तेव रोहितितिपिनेव वह्निनेनिशकांतेनेव चाभिरमयत्यवनीयशःपुंजं कीर्ति चन्द्रदिव्य विनतोतितनोतिलक्ष्मीं

अ॰ कौ॰
४॰
40

किं किं न साधयति कल्पलतेव विद्या ॥ अत्र लताया द्वयोर्धर्मा अभिन्नाः यथा वा जलइव उज्वाला लेवि अकुहरइमे लोचनरामवाणा
दिह्ह ओ रसइ जलओ णवओ अहीवुदिओ लंचेइमा हओ वाणद अल अत्र जलनादयोर्भिन्ना धर्मा एकत्रानेकेषां सा द्व
यमिति वीरामुपमा भवेत्तेनोक्तं येन वर्हिणा भासान्तां तुल्यान्तरं निघा भवेत् एकस्य बहुभिः साकमुपमानाद्देका
श्रया वहूष्वेकेपि समा दृष्यप्रूपोपि भेदस्तत्रोक्तः यथाः चंद्रवत्सप्रकाशं तेजोतिभीजो द्विजोत्तमाः एकेन सात्वनेके
षामुपमा परिकीर्तिता इयं च सामान्यधर्मैक्य एव संभवति उपमानस्यैकत्वादिति बोध्यं तत्रैव यथा तुल्यंते पाथिनाव
क्रमितिसैकतताभवेत् यत्रा इवगजापत्र वहूनां वहुभिस्तथा यथाहरिवंशे जलौघबलं चाबुद्धं दृष्ट्वा कीचनैर्य
त्तायोधयतीवायुः महत्तव्रक्रोन्दपतिर्वनस्थानानाजान्ताजेः सेविवीर्यदृष्टमान् अत्रैव सामान्यधर्मभेदयथा अल
समभइंरइणाउअपरज्जंगास्स मानरत्नो दुर्मिनाडकाभेदारोपोऽत्र उपगूहनेपवनस्थैर्वरंगाभेदारोपनिमित्तं अत्राविरोधिनास्सं
वंधेनानुग्राह्यानुग्राहकभाव इति विशेषः अभेदारोपस्य संसर्गारोपानुग्राहकत्वं यथा मम दृशौ नीलाम्भोजे वदनं तनुकु
चौ कोकनदं एणे वकाली यरोमावलिरपि च शैवाललतिका अवाहोलावण्यं त्रिवलिरियमाभाति लहरीकवीन्द्राणा
मंतः स्फुरति सरसी त्वं तपि ततः संसर्गारोपस्याभेदारोपानुग्राहकत्वं यथा ममैव मेराकिनीत्वमिह मौक्तिकमंजुदाम्नि
स्थूलेंद्रनीलगुलिकास्तवजांववत्वं धांतत्वमत्र तनमग्रीमदकर्दमेऽत्र वत्तोरुदः स्तनतुनेतपनीयशैलः एवमन्येऽपि भे
दाः स्वयमूह्याः इति अवान्तरपंक्ति समासगतपरंपरितरूपकस्थलेनस्तुरूपावयवभूतेकमितारोपे सर्वपदार्थस्याभेदसं ५९

वंधेनोभयपदार्थविशेषणत्वेन उपमेयउपमानाभेदसमर्थकत्वं न संभवति यत्संबंधस्य नियमसंबंधस्याभेदस्तस्मिंस्तदभे
द इति व्युत्पत्तेः सौजन्यचंद्रिकावंद्र इत्यादौ हि चंद्रिकायां सौजन्याभेदो राज्ञि चंद्राभेदसमर्थक इत्यभिमतं तत्र सौजन्य
विशेष्यकाभेदसंसर्गक चंद्रिकाप्रकारकारोपेणाक्षिप्यति न तु चंद्रिकायां सौजन्याभेदमा तद्यथा सौजन्यमनेयराधी-
श्चंद्रिकावत्सुखयति विधिः अत्र हि राजसंबंधिनि सौजन्ये चंद्रसंबंधि चंद्रिकातादात्म्यसिद्धौ राज्ञश्चंद्रतादात्म्यमुपपद्यं
न च चंद्रिकायां सौजन्याभेदबोधे सौजन्ये तदभेदोपि भासते समानवित्तिवेद्यत्वात् स्वस्वरूपाभिन्नाभिन्नत्वात् इति वाच्यं
प्रमाते सामग्रीसाम्यादेकवित्तिवेद्यत्वं शाब्दे तु व्युत्पत्तिविशेषनियत एव बोध इत्यतिरिक्तस्याभानात् एवं मुखं चंद्र
इति समासेपि कर्मधारये मुखविशेष्यक चंद्रारोप इति अत्र केचित् कर्मधारये अभेदो विशेषणस्य संसर्गः मुखं चंद्र इ-
ति वाक्ये चंद्रप्रतियोगिकाभेदवन्मुखमिति प्रतियोगित्वं मुखत्वात् मुखचंद्र इत्यादि समासे तु मुखत्वनिष्ठाभेदप्रतियोगि-
चंद्र इत्यनुयोगित्वं मुखत्वात् न तूभयत्रापि चंद्राभेद एव संसर्गः वाक्ये प्रतियोगित्वं मुखत्वेः समासे त्वनुयोगित्वं मुखत्वः इ-
त्येव विशेषः मुखचंद्र इत्यत्र मुखाभेदात्मकसंसर्गः चंद्ररूपकानापत्तेः विशेषणप्रतियोगिक एव अभेदः समासो-
न तु तदनुयोगिक इति तु न युक्तं निर्बीजत्वादिति तथा च सौजन्यनिष्ठाभेदप्रतियोगिनीयं चंद्रकेति भंग्या तेरा-
ज्ञः सौजन्ये चंद्रिकातादात्म्यसिद्धौ राज्ञि चंद्राभेदसिद्धिरिति अत्रोच्यते नीलघट इति कर्मधारये नीलप्रकारकाभेदसंसर्गा-

शं॰ बो॰
६०
60

कत्वं च विशेष्यकत्वानोदयात् विशेष्यताप्रतियोगिकएवाभेदः संसर्गः सत्तविशेष्यप्रतियोगिकः संसर्गमात्रं वा यमेव
नियमप्रकारप्रतियोगिकएव संसर्गो न तु विशेष्यप्रतियोगिक इति पर्वतो वह्निमानित्यादावनुमित्यादौ पर्वतानुयोगि
कत्वेन वह्न्यादिप्रतियोगिकत्वेनैव तस्य भानात् यत्तु द्रव्यत्वमात्रमेतिति दिति तदेव तु राग्रहः भासमानवैशिष्ट्यप्र
तियोगित्वं प्रकारत्वं भासमानवैशिष्ट्यानुयोगित्वं च विशेष्यत्वमिति सिद्धांतात् संसर्गस्य विशेषणतयोगित्वस्वीका
रेत्वं च तद्विरोधस्य स्फुटतरत्वात् किंच मास्तु सौजन्यविशेष्यकाभेदसंसर्गकचंद्रिकाप्रकारकबोधः शाब्दस्तस्मात्
एतावतानाकानामहाविर्भवतः येनाप्रसंसर्गस्य विशेषणानुयोगिकत्वमंगीक्रियते ननु यास्तिवंद्राभेदसमर्थ
कत्वानुपपत्तिरेव मानमिति चेत् न तत्तु तत्कालसौजन्यविशेष्यकाभेदसंसर्गकचंद्रिकाप्रकारकबोधत एव तत्सं
भवात् तथाप्याहुरसौ वनादृशाभेदज्ञानस्य तत्समर्थकत्वमिति चेत् न तत्किं सौजन्यनिष्ठाभेदप्रतियोगितायां चंद्रि
केति बोधस्तदभिमतः उभिमिति चेत् भ्रान्तभाषितमेवैतत् तत्र सौजन्यं प्रकारः अभेदः संसर्गः चंद्रिका च विशेष्यं तत्तस्मात्सौ
जन्याभिन्ना चंद्रिकेति नैव शाब्दबोधः प्रतियोगित्वानुयोगित्वयोः पदार्थतत्संसर्गोभयभिन्नतया शाब्दबोधाविषय
त्वात् न च सम्बन्धालंबनादिशिष्टज्ञानस्य भेदान्यथानुपपत्त्या संबंधसंबंधांगीकार इति नैतत् ज्ञानसंभव इति वाच्यं तत्र
तेपि विशेषणप्रतियोगिकत्वं विशेष्यानुयोगिकत्वं च सर्वथा स्वभासस्य न त्वेवांगीकारात् तथा चैकस्मिन् ज्ञाने न मत

६०

ग्रन्थकारेणपक्षद्वयेवैपरीत्यमाश्रयकथंनामनालज्जिष्ठाः वक्तृतोविशिष्टज्ञानात्समूहालंवनस्याभेदेनाप्येवनतत्संवंधः
संवंधभावेनेतिसिद्धांतानुसारिणांनैयायिकानामपिभवितुमर्हतीत्यपदेतत् तथाचसोऽजन्याभिलापंवंद्विकेतिप्रागुक्तवोधेजा
नोतदुत्तरभाविनाशोजन्यनिष्ठाभेदप्रतियोगिमोवंद्विकेतिमानसवोधेनयावत्त्वंदाभेदारोपः समर्थ्यतेत्युत्तवपर्यकमथ्यं
तदपेक्षयातदुत्तरभाविनावंद्विकाप्रतियोगिकाभेदप्रतियोगीसोऽजन्यमितिवोधेनैवतत्समर्थ्यतामलमसांप्रदायिका
धिकल्पनयाभंग्यंतरेणोक्तार्थवुद्धिकल्पनयाचेतिअपिचविंवप्रतिविंवस्थलेभिन्नानांधर्माणांपरस्पराभेदस्यशास्त्रवो
धविषयत्वाभावेपिमानुसाभेदारोपमात्रस्यसाधारणस्यप्रयोपगमात्हूलविंस्ताववदालंकारिकत्वावच्छेदेनस्वीकृतं
एवंतंजगत्सभवन्मतेषिश्चाचावंदकलाधरमितिसारोपेबहुमोत्लिभन्नतराद्दितस्यचवाधोपशमाह्लादुयाभावेपितानसहृति
नत्तानेसाधारणमपिसर्वसंमतं अयन्तुप्राहुःसर्वत्रसोऽजन्येवंद्विकाभेदारोपस्याप्रत्विवंद्राभेदारोपसमर्थकत्वमितितुरा
ग्रहांतातीवभवतोहितदेवः अथवात्रिचंद्राभेदारोपोपपादकःसोऽजन्येवंद्विकाप्रतियोगिकाभेदएववस्तात्प्रद्भुतानां अलं
नत्वात्तेएवास्यविकाविशेष्यकसोऽजन्याभेदारोपेणातिवेदं वाक्येनयैवप्रयोगात्समासेतुसर्वैतिपातानियमत्वपाशुद्धमस्तु एव
मितिप्रयोगोनसंभवतीत्यत्रकिंकुर्मः अन्यथावाक्येवंद्रप्रतियोगिकाभेदवन्मुखमितिवोधजनकत्वमुखंवंद्रइतिप्रयोग
वत्समासेपिकुतोनतादृशप्रयोगाइतिप्रतिसमंस्त्रभवानपिकिमुत्तरमितिदिशा अत्रेदमप्यधिकंवदंति वाक्यार्थविषये

अ॰ कौ॰
९१
८१

वाक्यार्थेन तु यो रोपे रूपकस्य पदार्थविशिष्टोपमायां विशेषणानामनुपमानोपमेयभावेऽपि गम्यत्वं तथात्रापि वाक्यार्थघटक-
पदार्थानां रूपणमर्थगम्यमेव यथा ग्राम्यमनोऽस्य तपोदामैर्मम लोकवशीहि यत् तास्तनं भास्करस्पंदं सरसैः सलिलोत्करैः ॥
न च यथेवादिशब्दप्रयोगे उपमा तयोरेकत्रारोपे रूपकमिति नियमान्नेदं रूपकमिति वाच्यं तन्नेवादिशब्दप्रयोगे उप-
मायामपि संभवात् नयिकोपामहीपालसूधांशोर्विवपाककरत्यत्रोपमा च नयिकोपामहीपालसूधांशोदन्वत्वादन
इत्यत्र रूपकस्यापि स्वीकर्तव्यत्वाच्चितत्वात् न चात्रत्र्युपमानोपमेयत्वेनैवेति वाच्यं अभेदनिश्चयोत उत्प्रेक्षायां तात्पर्यवतिप्रयवा-
योगात् न च मुखं चंद्र इत्यत्रापि तदापत्त्या रूपकविलयप्रसंगादिति प्राचीनास्त्वीदृशस्थले निदर्शनामेव स्वीकु-
र्वन्ति न तु रूपकं तथाहि तथाहि यद्यत्रापि भेदारोपे प्रोक्तमपि रूपकमनादृत्य निदर्शनैव युज्यते तर्हि मुखं
चंद्र इत्यत्रापि निदर्शनैवांगीक्रियतामलं रूपकेण । किं च इयं पदार्थनिदर्शना वाक्यार्थनिदर्शना वा नाद्यः विशि-
ष्टार्थयोरेवात्राभेदप्रतीतेः धर्मिणोरेव पदार्थत्वेन तत्सम्बन्धधर्मितद्वीयधर्मस्याभेदेनारोपविरहात् चलन्नेत्रभृंगालयते
लीलानीलांबुजन्मनोरित्यादिवत् न द्वितीयः वाक्यार्थरूपकोच्छेदापत्तेः न चेष्टापत्तिः वाक्यार्थनिदर्शनोक्तेरपीष्टाप-
त्तेः कर्तुं शक्यतया विनिगमनाविरहात् तवास्यं नवलतालिपोऽरंजयति यावकैः इंदुं चंदनलेपनपांडुरीकुरुतेऽन्हिम इति
निर्माणो वाक्यार्थनिदर्शनाविषयस्तत्रापि न च रूपके बिंबप्रतिबिंबभावो नास्तीति वाच्यं मानाभावात् कंदर्पद्विपकर्णा

कंबुमालिनैर्दीनांबुभिर्लीलितं सलसांजनपुंजकालिमकलंकं गोपयानैरतैः व्योमानोकहगुच्छगुच्छमलिभिः सं
श्लाघ्यमानोदयं पश्येन श्लाघिनः सुधासमुद्रचंद्रबिंबकलंकांकितं इत्यत्रशानमलादिकलंकानां बिंबप्रतिबिंबभावसी
काराद्धेति अत्रेदं प्रतिभाति उपमेयतावच्छेदकपुरस्कारेणोपमेये शाब्दनिश्चयमाने उपमानतादात्म्यं रूपकमिति
लक्षणं तावद्रूपतैव स्वीकृतं तत्र चोपमानोपमेयभावोऽभेदगर्भ एवावश्यं वाच्यः अन्यथा चंद्र इव चंद्र इत्यादावपि रूप
कत्वापत्तेः तथा च आत्मनो स्तनयोः दाने इति श्लोके निर्मलकरणात् तालनयोरभेदारोपेन रूपकं भवितुमर्हति तयो
र्भेदाभावात् तल्लक्षणो चेदित्यनुशासने न श्रीवमात्रेसालनपदश्लोकेः न च तपोदानजन्यस्य सलिलजन्यस्य च यो वस्य
भेद एवेति वाच्यं विशेष्याभेदविशिष्टभेदस्य विशेषणभेदपर्यवसानात् उपमानतावच्छेदकधर्मस्योपमेयताव
च्छेदकस्य च भेदस्य रूपकोपयिकत्वात् किं च त्वन्मादनस्वरामानामिप्यापि न रूपकसंभवः तथाहि नखानां स्तनपदवै
र्मत्यादिगुणयोगात् तत्र यावकसंबंधो निरर्थक इत्यत्रास्य तात्पर्यं तत्वाललक्तककरणाक नखकर्मकमार्जनं चंदनकर
णकं चंदकर्मकपांडुरीकरणाभिन्नमिति बोधेन न ... ध्यनिमार्जनस्य निषेधप्रतियोगितयाविवक्षितत्वेन तस्योपमे
यत्वासंभवात्तु यत्ना रूपणाभेदारोपसमारूपणामूलकतयालंकारत्वाभावात् किं चिदूर्ममघटितसारूप्यवालंका
रतायामप्रयोजकत्वात् तस्मात्तन्मतासंबंधेन यावकावकाभावो न तत्र भावो भाव्यां प्रतिपाद्यः तथाहि तेनैव संबंधेन श्रीखंड

अं.कौ.
९२
62

लेपाभावस्यैवं दर्शितप्रायत्वात् तेन च निदर्शनायां सर्वत्राभेदप्रतियोग्यनुयोगिनोर्वाक्यार्थयोरसंभेदप्रतियोगितो
वाक्यार्थस्याप्रसिद्धत्वनियमएव रूपके तु न तथा तद्यथा पादाम्बुः सौम्यतासेयं हृष्टिमोहं दे रकालिकता क्व सूर्यप्रभवो वंशः
क्व चाल्पविषया मतिः तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरं सोऽयं कुवेरोः कचयग्रहः कस्त्वविराः भेकैः कम्पातः काल
सर्पस्य वत्सकैर्विंदिग्द्दो व्याघ्रस्य तिमिरैस्तिरस्कारो द्वेधः यौमौवराणां मालवेः परिभवइत्यादौ च ननु नायं नियमः
प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः सुधासूतेश्चंद्रोपलजललवैरर्घ्यघटना स्वकीयैरंभोभिः सलिलनिधिसौ
हित्यकरणं त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियं वियोगीगौरनारीणां योगांऽनलपांडिमा अत्र दृष्यतस्व
न्नैरीमंजरीराभेदेणषु इत्यादौ च न दभावादिति चेत् किं ततः न ह्यभेदारोपमात्रेण रूपकालंकारत्वं निर्वहतीत्युक्त
त्वात् अन्यथा घटः पट इत्यादेरपि तत्त्वापत्तेः तथापि ह्येनापि धर्मेण तत्रापि तदभेदारोपः कथमिति चेत् नहि वयं
तत्राभेदारोपो न संभवतीति ब्रूमः अपि तु तस्यालंकारत्वमात्रमिति दोषाभावात् न तत्राभेदारोपमात्रस्य चमत्का
रजनकत्वाभावात् किंचिद्धर्ममादाय पर्यवसानं क्वचिदन्यथेत्यन्यदेतत् तथा च नलिनमार्जनेन पाण्डुरीकरणाऽभेदारोपस्य
नलोत्कर्षपर्यवसानाभेदस्यालंकारत्वमुचितं अपि च यत्पादनलिनानि योरंजयति पावकैरित्यत्र नलिनमार्जनं कथं
न रूपकं कर्त्रोरभेदस्य तत्रापि प्रतीतेः एवं क्रियायोरभेदस्य घाता त्वात्तस्यैव सर्वभरसदृशत्वान्निदर्शनैवेति तदसत्

कत्वेऽभेदेन रूपकत्वमतेरपरिहारात् यदपि मुखं चन्द्र इत्यादौ श्रौताभेदारोपस्य रूपकजीवातुत्वस्य स्वकमत्वादिहापि
तथा अभेदारोपस्य निदर्शनाजीवातुत्वं न संभवति इंद्रयोभाव इत्यस्य स्थितिपदार्थनिदर्शनायामभेदारोपा
भावादिति तदयुक्तम् अभेदारोपमात्रस्य रूपककल्पकत्वाभावात् कथमन्यथा साहृश्यमूलकस्यापि कार्यकार
णादीनां कस्यचित्स्यता रूपस्य रूपकत्वाप्युपमेतरमूलकानां स्वत्यादीनामपि रूपकत्वापत्तिरिति दूषणं संवं
भो ध्वंनरमसुतं तादात्म्यविवक्षायामपि रूपकमिति रत्नाकरमपि कुत्स्यस्वयमेवाभ्य
धा यि किं च रूपकत्वावच्छेदेन श्रौताभेदस्य जीवः अभेदस्य विशेष्यतायां तदभावात् तथा च भवदी
मे योदाहरणं कैशोरेव यस्तिक्रमेण मनसा यातित सुनावाग्गामिन्यविलेख्येर इति पत्नौ वाल्ये मनोभवं
चकिता स्पृशि प्रशांकतानयनयो हंसीकिं चासीदनन्तस्यभेदविगमः सा विस्मितेतालिकः
श्रवांतरधर्मावच्छेदेन तदुपजीवकत्वमतनिदर्शनायामपि समानं अथाभेदारोपपदेनाभेदसंसर्गकाभेदविशे
य कोभयारोपसंग्रहाद्रूपकत्वावच्छेदेन तदुपजीवकत्वमक्षतमिति चेत् तथापि निदर्शनात्वसामा
धिकरण्येन रूपकत्वावच्छेदेन वाऽभेदारोपोपजीवकत्वमिति विशेषस्याप्रयोजकत्वात् एवं चं
द्रनादामयवदित्यादौ तदभावात् अभेदविषयकारोपत्वमतदनुगामेऽपि तद्दृश्यसाधारणधर्मवि

अं॰ कौ॰ षयकारोपणीयकत्वं निदर्शनात्वावच्छेदेनास्तीत्यपह्नुत्यसमस्यकल्पि शंक्यनात् यदपि निदर्शनायां तादृप्यपदार्थयोः
६३ परस्पराभेदमात्रं शरीरं रूपकस्य तूपमेयमात्र उपमानाभेद इति तत्रोक्तं तथापि निदर्शनमते विशिष्टवाक्यार्थे रूपके त
63 न्तुष्टकपदार्थानामभेदस्यार्थगम्यत्वात्तत्र रूपकत्वानापत्तेः तत्राभेदस्योपमानत्वगम्यतया परस्परप्रतियोगिकत्वे
न परस्परानुयोगिकत्वेन च विषयीकरणे बाधकाभावात् मुखं चन्द्र इत्यादौ तथा ह्युबोधस्याप्युपमितिनियन्तृत्वेन तद्वेतो
पमानोपमितियोगिकस्यैवाभेदो विषय इति युक्तं तेनैव परस्पराभेदावगाहनेन किंचिदस्ति बाधकं नाप्युपमानप्रतियो
गिकाभेदभानं रूपकनियतं मुखं चन्द्र इत्यादिसमानस्थले तदभावात् न च तत्रापि मुखनिष्ठाभेद एव संसर्ग इति
वाच्यं तस्यानुपपन्नमेव निरस्तत्वात् किंच यत्र बोधे चन्द्रप्रतियोगिकाभेदावगाहनेऽप्युपमानस्य गम्यपरस्पराभेदमादा
य तत्रापि रूपकत्वं न स्यात् न हि शाब्दाभेदबोध एवालंकारत्वप्रयोजक इति शक्यते वक्तुं निदर्शनास्थलेऽप्यार्थाभेदबो
धस्यालंकारत्वप्रयोजकतायास्त्वयैव स्वीकारात् एवं च मानस्याभेदयोपस्योभयत्रैव संभवान्निदर्शना रूपकं चेति दुः
करयकप्राप्तः स्यात् तस्मात्तत्पादनलवरत्नानामित्यादौ निदर्शनैवेति वाक्यार्थरूपकत्वं निर्मूलमेवेति दिक् ॥ इति
रूपकम् ॥ अपह्नुतिं लक्षयति प्रकृतं निषिध्याभिधानान्यतयामोक्तावपह्नुतिः कथिता यत्र प्रकृतमुपमेयं कण्ठाविह्न
ह्नुतोऽर्थतो वा निषिद्ध्य तत्तत्स्वरूपाः प्रकृतार्थेनारूप्यमाणापि तेन सापह्नुतिरित्यर्थः रूपकातिव्याप्तिवारणाय निषिद्धेति
६३

अत्र मुखे चंद्रमारूप्यवर्णने ऽपि न मुखनिषेधपूर्वकं तदिति न दोषः अत्र केचित् सादृश्यशास्यलपवापह्नुतिः न पंचेषुः
स्मरस्तस्य सहस्रं पत्रिणां घ्नत इत्यादौ तु नापह्नुतिः किं तु मकृतस्य यदन्यत्वमित्येवं रूपातिशयोक्तिरित्याहुः अन्ये
तु गोपनीयं कमप्यर्थं गोपयित्वा कथंचन यदि श्लेषेणान्यथा वा कथयेत् सापह्नुतिरिति सद्विपर्ययेण केचिदाः
किंचिदप्यह्नुत्य कस्यचिद्दर्शनमपह्नुतिः केसेस्ववलामोऽद्रि अनेन समरम्मिज असि रीगद्वि आनहकं धरादिवि
इत्यत्र स्तुवि ... फकंठ असि संठविद्या इत्यत्र सादृश्याभावे ऽपि न पल्यन्यगतानाप्तदैवरिणोः पित्ततनः परा भवं संभा
व्यकं ... यथापवतानस्यजं नीत्यपह्नुतिरिति अत्र इति काव्यप्रकाशकारेणानङ्गीकृतमित्याहुः तच्च शा
... हेमकलनिषेधे यथा मम नेयं मेघघटा घंटतविरदोदामाग्निधूमावलीनभ्राम्यति सकंदिकाव
लिरसौ वैधूम्रकपांथात्मनां नैतानि स्फुनितानि किं तु मदनस्याधन्यनिर्भर्त्सिनाः केतकानि रजांसि द्रप्यपथिकग्ला
नोयभस्मानि तु इत्यत्र क्रमेण मेघघटादीनि निषिध्य धूमादिरेव तत्तत्स्थाने ऽभिषिक्तः आर्थिकोपथा विनिद्रपुष्पा
लिंगिताः लिकेतवा नयगांक चूडामणिर्वर्जनार्जितं दृश्यावमाधामवरिसजर्पशः सकौतकीतत्र दर्शके तु कव्य
अ ... अत्र हिम्मरस्याजलतोत्यानैर्निभ्रमराः किं तु दर्पणा इति भ्रमरनिषेधमतीतिरस्यात् नहि भ्रम
राणां सत्यत्व विवक्षायां कैतववाकिर्घटते सावयवा यथा मम नेदं रजितं मलिकार्मुक रत्नं किं तु जितं ने

श्रं॰कौ॰ वाजिस्तनगराजिराजिवदने किं न यथाराततिः नेयं मायककौवनकृतिस्सदामैदामिनी किं नमैनायं वीरकुला
६४ गणीहृदयते किं त्वेषधाराधरः अत्रापह्नवांतराणां वीरापह्नवानुग्राहकत्वात्सावयवत्वं क्वचिदपह्नवांतरानु
64 गृहीतस्यापह्नवस्यापह्नवांतरानुग्राहकत्वं यथा स्मितं नैतत् किं तु प्रकृतिरमणीयं विकसितं सुखं ब्रूते मुग्धः
कुसुममिदं मरुत्स्परिमलं स्तनद्वंद्वं मिथ्याकनकनिभमेतत्स्तनयुगं लतासेयं रम्याभ्रमरकुलं नम्यानरमणी ॥
अत्रास्मितापह्नवो मुखापह्नवानुग्राहकः मुखस्तनापह्नवौ तनलतिकापह्नवानुग्राहकाविति अभिप्रायः सावयवा
पह्नुतामुदाहरन्नामवक्षेपः मालारूपा यथा क्वापि स्त्रीवनिपिकलात् क्वचिदपि श्रोत्राहृत्कुंदकलात् क्वापींद्रराज
कलात् क्वचिदपि मालेयरश्मिकलात् कुत्रापि स्मरवैरिदेहमिषतः कुत्रापि शेषकलात् त्रैलोक्यं हिमवत्तल्पकांति
रहति श्रीवान चंद्रमभोः अत्रवह्निभिषिध्येकस्यारोपः इकंनिषिध्य बहूनामारोपो यथा नारीणामनुरंजनानुनय
नातं चाश्रुगस्याश्रुणातप्राचूर्णामवधीरणायकरणाव्यापारतः पांडुवान् कामानामनुसरणात्स्वरतह्मीतातिसं
जीवनात्प्राणान्यागीरयं विभर्ति रूपते: पंचांगुलीव्याजतः अत्र वाजचंद्रांगुलिनिषेधपूर्वकं तत्र कामबाणाद्य
भेदारोपः यत्तु अप्रस्तुतस्यारोपार्थः यपिस्तापह्नुतिलक्षणा मायंसपंथीभः किं तर्हि मपंथीभुः मेपसीखरवमिति तत्राहुः ॥
प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः इत्यपह्नुतिसामान्यलक्षणानाक्रांतत्वान्नायमपह्नुतिभेदः किं तु रूपमेया

पमाननावच्छेदकयोः सामानाधिकरण्यस्याभासमानत्वाद्रूपकमेवदृढारोपमेतत् नविषंविषमित्याहुर्ब्रह्मस्वं
विषमुच्यतेइत्यादौतदंगीकारादिति यत्तु क्वचिन्निषेधपूर्वकआरोपः क्वचिदारोपपूर्वकोनिषेधइतिभेदवर्णनं
तच्चमत्कारविशेषानुपलंभादिहोपेक्षितं अपह्नुतिद्वैधनिर्णयाममत्वत्प्रमनीकनरनायिकनायिकानां
हृद्भिर्वियोगदहनज्वरदह्यमानैः प्राणावसानमिलितैर्ज्वलनं किं विदंशपीयूषविंदुमवुधाः सकलंकमाहुः अत्र
नायंकलंकः किंतुतन्ममनोयोगाज्वनपीयूषच्छिद्रमितिमन्ये इति चित्रमीमांसायांतु त्वदालेख्यकोनदृहलनरलत
न्नीविरचितेविधायैकावक्रंविलिखतिसपत्नीसतमपि अपिविषिधत्ताणिस्त्रवितमपमस्ज्ञैतनदपराकरेपोष्यचापं
मकरमुपविष्टाद्यलिखेति अत्रनायंसाधारणपुरुषः किंतुनारायणायतिरणारितिचक्रादिलिखनेन प्रत्यतेअन्य
पात्वनसाध्येनाटशानरूपविरेहणानायंनारायणः किंतुकामइतिपोष्यचापलिखनेनव्यंजितमित्युदाहृतं तत्र
गंगाधरकृतस्तु उपमेयनिषेधउपमानारोपश्चेत्यपह्नुतेर्भागद्वयं तत्रचक्रादिलिखनेनपुंडरीकाक्षोपमि
त्यारोपभागएवव्यंज्यते तेनाकान्तेननत्वनायंसाधारणः पुरुषइत्युपमेयनिषेधभागोपिचक्रादिलिखनस्यपुंड
रीकाक्षारोपमात्रव्यंजकतयानिषेधाभिव्यंजनेसामर्थ्याभावात् नचपुरुषतादात्म्यनिषेधंविनानारायणतादा
त्म्यानुपपत्त्यानिषेधोपिव्यज्यतइतिवाच्यंमुखंचंद्रइत्यादावपिमुखनिषेधमंतरेणचंद्रारोपानुपपत्त्यातत्रमुख॥

श्रृं०कौ० निषेधाभ्युपगमे रूपकोच्छेदप्रसंगात् न च तत्र प्रस्तुतस्य सामानाधिकरण्यमात्रेणैवं ज्ञाभेदानुभवात् प्रस्तुते निषेध
९५ इति वाच्यं अत्रापि साधारणधर्मसत्त्वसामानाधिकरण्येन पुंडरीकान्तारोपसंभवात् रूपकध्वनित्वस्यैव स्वीकर्तव्यत्वमपि चि
65 न्तनात् न च स्वशब्देनैव मारुतापह्नुतिः तस्यापि चक्रादिरूपैककरणेन नायं पुंडरीकान्त इति निषेधस्य मुखावापल्लिखितेना
यं कामः इत्यंशस्य च व्यंजयितुं शक्यत्वात् उत्तरार्द्धेऽपह्नुतिरास्तेनिवाच्यं पुंडरीकान्तस्य चारोपित्वाभावेन न तन्निषेधस्या
पह्नुत्यघटकत्वात् आरोपपरस्यारोपविषयतायाः स्वरूपेणैव ख्यापनात् प्रस्तुत यत् किंचित्प्रकृतनिषेधसामानाधिक
रण्येन क्रियमाणं वस्तुतस्त्वारोपत्वमेवापह्नुतित्वमिति लक्षणकरणात् एतत्तु प्रकृतमेवापह्नुतित्वमित्याहुः वस्तुतस्तु
त्वं चंद्र इत्यादौ मुखत्वं तद्धर्मिताविच्छेदकीकृत्य चंद्रतादात्म्यारोपस्यानुभवसाक्षिकतयाऽभ्युपगमेऽपि प्रकृते पुंडरीका
न्तभेदव्याप्यचक्राद्यभावस्य साधारणधर्मस्य च चक्रादिभिरपसारणेन साधारणधर्मनिषेधमंतरेण पुंडरीका
न्ततादात्म्यस्य व्यंजयितुमशक्यत्वात् तन्निषेध आवश्यक इति दीक्षिताशयः साहित्यदर्पणकारास्तु अयं निषिद्ध्य प्र
कृतस्थापनं निश्चयः पुनः आरोप्यमाणं निषिद्ध्य प्रकृतस्योपमेयस्य स्थापनं निश्चयालंकारः यथा वदनमिदं न सरो
जं नयने नेंदीवरे एते इह सविधे मुग्धदृशो मधुकर न मुधा परिभ्राम्य यथा वा हृदि विसलताहारो नायं भुजंगम
नायकः कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः मलयजरजो नेदं भस्म प्रियारहिते मयि प्रहर न हरभ्रान्त्यानं

कुतो किं मुखाब्जमस्ति न वायं निश्चयांतः संदेहः अत्र संशयनिश्चययोः सामानाधिकरण्यात् इदं तु भ्रमरादेर्भ्रांतिनि
श्चयादेर्निश्चयस्य नैव यधिकरण्यात् अयं कथं विरोधः संशयनिश्चययोः सामानाधिकरण्यं विवक्षितं तथा च भ्रमरादे
रसंशयज्ञानाज्ञापकेऽपि संशयोऽस्त्येव ज्ञानं ज्ञानस्य बाधकं विना तज्ज्ञानविषयविषयकत्वनियमादिति चेत् न तथा
पि नात्र भ्रमरादेरपि संदेहः समकोटिकज्ञानस्यैव संशयत्वात् अत्र च तथात्वेऽनुपलब्धमीपगमनादिवर्णनानुपप
त्तेः न हि भ्रांतिमानेवास्त्विति चेत् न भ्रमरादेर्भ्रांतिसत्त्वेऽपि इह चमत्कारानाधायकतया नालंकारत्वात् नाप्यज्ञाना
पकोक्तेरेव चमत्कारकत्वात् भ्रमरभ्रांत्योदरविवक्षायामपि नायिकाभीत्यर्थमण्येनादृशोक्तिसंभवाच्च न चापह्नुतिः कथ
त्तिः मुखस्य कमलत्वेनानिर्दिष्टरणात् नाप्यपह्नुतिः प्रस्तुतस्य निषेधाभावात् अतः पृथगेवायं विदितो नोक्तालंकारेभ्य
इत्याहुः जयदेवस्तु भ्रांतापह्नुतिरन्यस्य शंकायां भ्रांतिवारणेन तापं करोति सेतकं देज्वरः किं न सखि स्मरः इति तत्त्वो
क्त्या भ्रांतिवारणोक्ते भ्रांतापह्नुतिरित्याहुः दीक्षितास्तु अपि संभवद्भ्रांतिरूपविकायामपह्नुताविदमुदाहरणं कल्पित
भ्रांतिरूपविकायां तु जटाने यं वेणीकृतकचकलापो न गरलं तं गले कस्तूरीयं शिरसि शशिकलेनेदं कुसुमं इयं भ्रांति
गोऽपि यविरहजन्मा पवलिमा पुरारातिभ्रांत्याकुसुममशर किं मां प्रहरसि अत्र कल्पिता भ्रांतिर्जगानेयमित्यादिनिषे
धमात्रोऽन्तोऽपूर्ववत्तत्वभावादित्याहुः इत्यपह्नुतिः श्लेषमाह उभयविशेष्यान्वितयोरेकेन मोक्तिरर्थयोः श्लेषः उभय

अं॰कौ॰ परमेकमभिन्नपर्यन्तमद्वयोरपि विशेषो यथा प्रकृतमेव गतेषु मैत्रेषु प्रशमेऽहेतोः सलज्जचित्रस्तनयोर्नतभ्रूः हरेस्तन्
९९ ज्ञप्रतिपन्नकालं न्यपश्रियान्वेषणात्तमयोऽभूत् अत्र द्वन्द्वमहत्त्वं नयोरुभयोरप्युभयकथायां प्रकृतत्वं यथा वा आत्त
66 याचयितुं त्वभियाचक्षीरहीयत महीमखवाद्भिः लंघितस्वभवनाकिंमुनद्विंगादिराशिस्तदंकांककलंकः अत्र श्रीरा
मकृतौ समस्तवैतिरोहिते योर्व्याप्रकृतत्वं यथा वा हिमसमुकं चंद्रहविरःसपद्मकोमदयनाद्विजानजनितमीनकेतनः
अभवत्प्रसाधितसुरोऽसुरोत्सवः समस्तसमनसमस्तचिरायमाधवः अत्र भगवतो वसन्तादेश्च प्रकृतानां प्रकृतत्वे अप्रकृतश्ले
षो द्विधा सभंगोऽभंगश्च भिन्नानुपूर्वीकपार्द्रप्रतिसंधानवोध्यार्थी नरकत्वं सभंगत्वं समानानुपूर्वीकपार्द्रप्रतिसंधान
योध्यार्थीनरकत्वमभंगत्वं आद्यस्योदाहरणं तत्प्रथमश्लेषो यथा प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता
अवलंबनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि अत्र विरुद्धविधिवशाद्योर्धियाविरूपं परश्लेषो यथा संनद्धेभग
दत्तप्रांशुविनिनदत्तस्त्रिलोके बलेनप्रोत्तानप्रतकरिकुंभकाणिहतनामारव्यकोलाहलेतीतानोणपतिपीतरुधिरस्मा
गमारयोरोरासंप्रावर्तिष्टदिवोनिर्थीकृतमहायोधंमहायोधनं अत्र रामायणपक्षे संनद्धायेरभगाद्दशमारोहालेदत्तोयः
पांशुविनिमदःभारतपक्षे संनद्धे इति बलविशेषणं भगदत्तो राजविशेषो भारतप्रसिद्धस्तकुलेत्यादि लिंगश्लेषो यथा प्रम
उन्निद्राब्जपरिष्कृतप्रवरोरः महीभवदैवतश्रेणीमौलितटावघटितमणिज्योत्स्नासमस्तशासिपात् उन्मीलद्घनसारसंद

तिसहचयकलाविरामहृदकरूपंकैटभमेदिनोमदनजिहासाचंद्रिकाचावतु अत्रदोविंशादिरूपंपंचिषुलिंगेषुसमानं
लिंगमपिभ्रादिपदिकार्थ इतिपदेणोदग्नकं भाषाश्लेषोपयामभेवा अवाहराविरूरेकामंमेसूद्दितोरेइसरसावि
उरेहालीकरणोसविडूरामदसा अतेत्रसंस्कृतपदेइतिलक्ष्मीसंवुद्धिः अवेनितद्धिशेषणामरणांद्दितविषये
अरेषोत्रेइत्यपितथाह्नीवेषीआयुसत्वेसात्रिषधेभेदगामियतइत्यमरात् अपदस्पोच्चवत्पस्यस्रोतंअविह्नर
मंतिद्दितमेवममकामंआहरसंपादयेत्यर्थः विडूराणांपंडितानामोहालीइच्छापदंपरागतमकरोमसरसामभीतिःख
पुविंदंतितत्स्वरूपंजानंतिसविदस्तानुवरतिसंसारादितितथाइदंचत्वमितस्यविशेषणं प्राकृतपदेतुकसाविर
हिराद्दिणउक्तिः तामाधराविदेरेकाममंसरभिस्लाररयतिवद्देयतिसरसाभधाह्वापिद्दिरेफालीकरणोषपिउद्दिरास
हसा उद्दीपकत्वेनतच्छहृस्पश्रोत्रमधाकत्वादित्यर्थः मकुतिश्लेषोपयामभेव गायतिवलयारीतिंद्रियार्थाश्रमणे
त्वदनयतिद्दिमराश्चजीवितानांचसमः नयनमपिमुहूर्तंतवर्षयत्यंजसामंदपिततमविद्योगःस्मरपंकेरुहासः अ
वगुरुत्वकरोतिगरवत्करोतीतिअर्थद्वयेपिगरयतीतिदववत्करोतिहरीकरोतीत्यर्थद्वयेचदवयतीतिवर्षवत्क
रोतिहृषिवत्करोतीत्यर्थद्वयेचवर्षयतीतिरूपंसमानं प्रत्ययश्लेषोपयामम मानभारमवलंबमुपरायाग्रथिभि
र्निविडितांकिलतस्याः मेयसीत्तणापथं गतमात्रेसोहलासमस्तविनीविरदंसैच अत्रलिदिप्रथमोत्तमपुरुषैकवच

८०
गी.गो.

अ॰ कौ॰
९७
67

तेन तथा वित्सल्लालासेति वह्नपंतत्वं विभक्तिश्लेषो यथा ममैवा दृष्ट्वा मौक्तिकविशदाञ्चपराववपि विवसंकाशौ नत्विव

कामसन्निवदनेन तवनासावंशमोदयी अत्र चकास्मनीति तिङ्विवद्रवचनांतं शान्त प्रत्यये समस्मैकवचनेपि तदेवद्रूपं वचन

श्लेषो यथा अपि लोकयुगं दृशावपि श्रुतं दृष्टारमणीगुणा अपि श्रुतिगामितयादमसद्वृत्ति भातेस्मतरां परापते अ

व्यतिभाते इति वचनत्रयेपि तत्त्वां अमाशानांमध्येपरस्य यत्रांतर्भावः प्रतिभाति तत्र तद्धि प्रतं विवरणीयं अनेनैव दोष इति

ध्येयं अत्रायं विवेकः द्विविधोप्ययं श्लेषोर्थालंकार एव अर्थालंकारस्य वाक्यार्थान्वयेनानार्थकपदसत्वे पि श्लेषव्यवहाराभावा

त् तथा हि सवितादिगुणभेदेन भिन्नानां शब्दानां भिन्नप्रयत्नोच्चारणयोग्यत्वे पि श्लेषोपपत्त्यर्थं स्वरभेदमभ्युपेत्य एकप्रयत्नेनोच्चा

रणेन श्लेषः यथा हपुकार्तस्वरपात्रंभूषितपरिशेषपरिजनं देव विलसत्करेणुगहनं संप्रति सममावयोः सदनम्

इत्यादौ समासभेदेन स्वरभेदान्नभेदेन च शब्दभेदाव्यपकत्वान्न त्रपतकाष्ठन्यायेन शब्दयोरेव श्लिष्टत्वात् यत्र तु स्वरभे

दो नास्ति तत्रैकप्रयत्नोच्चार्यत्वेन शब्दभेदाभावादर्थश्लेषः एकवृंतगतफलद्वयन्यायेनार्थयोरेव श्लिष्टत्वादिति सर्वस्व

काराशयः काव्यप्रकाशकारस्तु दोषगुणालंकाराणां शब्दार्थगतित्वावधारणं तावदन्वयव्यतिरेकगम्यं तथा हि शब्दानां

परिवृत्त्यसहत्वं शब्दवृत्तित्वं तत्सहत्वे त्वर्थवृत्तित्वं कष्टत्वादिदोषाणां गाढत्वादिगुणानामनुप्रासाद्यलंकाराणां च शब्दनिष्ठाः

नानाच्छायानुसर्वीकशब्दोपादानपदंतदवभासात् व्यर्थत्वादिदोषाः ओजआदिगुणा उपमाद्यलंकाराश्चार्थनिष्ठाः तदर्थक

७

शब्दानां तेषां पाठेनैव प्रियत्वाभयानुगतार्थमनोज्ञत्वसंभवात्तत्र नहि विषयत्वात् यथा लोके नौमि तिमायाति लोके नाम तथो
गतिं श्रुत्वा वसहदपिहृतिस्तस्या कोटेः खलसदृशस्यादावस्थेनोन्नतिमायातीत्यादिप्रयोगे पिश्लेष निर्वाहात् किंच शब्द
श्लेषोर्थालंकार इति परस्परव्याहतं श्लेषस्य शब्दानाश्रितत्वे शब्दश्लेष इति व्यपदेशानौचित्यात् तथात्वे चार्थालंकार
त्वानौचित्यात् कविसंरंभगोचरस्यैव वैचित्र्यस्य दर्शनालंकारत्वात् प्रकृते च शब्दानामेव कवेस्तात्पर्यविगमात् य
तथा च खमेलितं शब्दानामिति तन्न एवं सत्यनुप्रासादीनामपि अर्थालंकारत्वापत्तेः रसादिव्यंजकत्वार्थमेव तेषा
मेवानुप्रासादेरलंकारत्वात् एवं सति शब्दानामभिमतया न दोषादेरपि अर्थत्वापत्तेरर्थापत्तेरेव न ख्यातत्वात् यदप्यु
क्तमपलो ह्यर्थयाहुर्वं ये: [illegible] श्लेषत्वमिति तदपि न विधावित्यादि वाग्विशेषस्यापि श्लेषत्वापत्तेरित्याह इदं चात्र विचा
र्यं श्लेषः श्लेषस्तावदलंकारान्तरस्य विषयेति विश्रामानोत्पद्यते यथा सकलकलपुरमेतज्जातं संप्रति सुधांशुविं
बमिव वृत्तं त्रोपमायाः [illegible] कामगीति तत्र रूपकस्य नास्यः कविरिव स्वल्पश्लोकोदेवमहामत्रवानितिव्यतिरेक
स्य [illegible] नतीसंभवादिव समस्तमत्सुः सतः [illegible] देवगतिश्चित्रा तथापि न समागम इति समासोक्तेः आरोपकाप
मवलंकृता होनं [illegible] विषयत्वाद्धिः यच्चित्रमद्भुतशायेलत्तमभांती ममस्तस्मे इति विरोधस्य कवीनां संतापे
[illegible] भवनानामभितोद्गगनि रितित्रयाणां पंचवं रचपलितनतचित्रमधिकं त्रया

श्री
९८
68

णां वेदानां व्यस्य वि ववतावीरभवता द्विषसैकाली नामप्रतमेपि लक्षं यदेकयाः इत्यनुमाम
सेयादि [illegible] तत्र किं श्लेषे केषांचा: [illegible] पकोवाध्यो वा संकीर्णो वेति अत्र केचित् श्लेषस्यालंकारां
तरनिर्मुक्तस्थलान्तराभावान्निरवकाशत्वेन सर्वालंकारापवादकत्वमेव यत्र हि द्वयोरेवासमत्वं स्त
न त्वंवानन्तवत्तुल्ययोगितायाएव संभवात् मवदेव तत्त्वमेव यानालमायणानां त्वांनिवंधनं संचाम सम दन्तुमि
दकोललोकत्रयात्मकः इति विवक्तोत्र विषयः इति वाच्यं तत्रापि श्लेषोपमायामपि तयोरभेदं विना लोकत्रया
त्मकत्वानुपपत्त्या रूपकसंभवात् अत एव हिमानन्से त्यादौ मनस्यभिमानसत्वारोपणात्सकलत्वस्याप्तिहंसत्वारोपे
णोपहारत्वादेश्च प्रतीते रूपकत्वस्वीकारः अत्र तत्राप्तिप्राणालत्वारोपणे प्रयोजनाभावाच्छ्लेष एव केवलस्तत्र यथा मि
ति निश्चितं अत एव च तत्र क्वचिदपि रूपकस्यावाच्यतदेवलैपेव विविक्तविषयगवेषणादि त्यपि नयुक्तं नचैवं तत्र क
थमनुपमारूपकादीनां प्रतीतिः त्वन्मते तत्र तेषामभावादिति वाच्यं तेषां प्रतिभानमात्रस्वीकारात् सेत्येतत्समर्थोरञ्जनतम
तीति वत्तत्रापि केवलस्य श्लेष एव तस्मादीदृशस्य श्लेष एव सर्वालंकारबाधको युक्त इति अन्ये त्वाहुः विषयान्तराभा
वे हि बाध्यबाधकभावो युक्तो न त्वत्र तथास्ति श्लेषस्यालंकारान्तरनिर्मुक्तविषयसत्त्वात् यथा येन ध्वस्तमनोभवेन ब
लिजित्कायः पुरा स्त्रीकृतो यश्चोद्वृत्तभुजंगहारवलयो गंगां च योऽधारयत् यस्याहुः शशिमच्छिरो हर इति स्तुत्यं

वनामतः पायात्सत्वपर्यंपकत्वकारत्वांमविरोमाधवः मत्रत्रतत्स्ययोगितासंभवतिहरिहरयोरेपमस्याव्रान
भिसंधानात् एवंचविविक्तविषयसङ्गावात्कथमस्यालंकारांतरबाधकत्वमिति किंचविविक्तविषयासत्वादलं
कारांतरापवादकत्वमित्यपितत्रुत्संविषयसङ्गावमात्रेणोपपन्नौविविक्तविषयापेक्षायांमानाभावात् लोकेप्यपं
भरत्वानांनिरवकाशत्वयातदोषुयस्ववणोस्यालंकारत्ववाधापत्तेः मीमांसकादावपिपदेन्नहोतीस्यादिवज्ञत्तराईन्नु
होतीत्यादिनाग्रहवतीयेग्नहोतीत्यादिविविक्तविषयाभावेपिसविषयत्वमात्रेणावकाशात् प्रकृतशास्त्रेपिस
होक्त्यादीनामतिशयोक्त्यादिविविक्तविषयाभावेपितदभावेनालंकारांतरत्वव्यवहारात् यदप्युक्तं उपमाप्रतिभो
त्पत्तिहेतुःश्लेषोयमिति तदपिनउपमायाएवश्लेषप्रतिभोत्पत्तिहेतुत्वात् नगरवर्णानप्रक्रमेइवादिशब्दप्रयो
गाभावेसकलकलेतिविशेषणदानेपिद्वितीयार्थस्यप्रतिपत्तेरभावात् नत्विदंकथमुपमासामान्यधर्माभावात्
नचसकलकलत्वमेवतथेतिवाच्यंकलानांकलस्कौलद्वलमादिरयोर्भेदादितिचेत् मैवं नपौरभेदाध्यवसाये
नसाधारणधर्मनिर्वाहात् बिंबप्रतिबिंबभावादिरूपत्वेवस्तुतउभयानुगतानामपिधर्माणांसाधारण्यस्वीकारेण
मुख्यसाधारण्यस्यानपेक्षकत्वात् यथामल्लारदेवांबुदः सत्तायामपनीयपया तथैवलोभूदच्छ्रीराजामहतिरंजना
दिव्याजादवर्न्नर्थसंज्ञावत्त्वसाधारणधर्मत्वात्त्वमस्तीपमेवश्लेषस्यबाधिकेतिवक्तुमदं रूपीपमादिसाधारण

अ॰कौ॰ ६५ 69

धर्मप्रयोग एव संभवतीति न त्वन्यथा तत्र चार्थश्लेषादेरावश्यकत्वात् तद्धि निर्मोकोपमाविषयाभावेन तथाश्लेषवा
धस्य युक्तत्वात् एवं समरार्चितोऽप्यमरार्चित इत्यादावपि विरोधस्य लेशस्य प्रतिभानमात्रं न तु वस्तु
स्थितिः द्वितीयार्थस्यानन्वयेऽप्रौढत्वात् एवं अविरुद्धसंदर्शीति त्वं गलल्लावण्यविरुद्धकाऽस्मादा॰
वपि नात्र विरुद्धभावेन संदर्शीति प्रतीयमानो द्वितीयोऽर्थः प्रकृतोपयोगी न च विरोधस्यापि पारमा
र्थिकस्य नित्यो निरपेक्षत्वादेतन्नालंकारत्वायेत्याः पर्यवसन्न एव विरोधोऽलंकार इत्यभ्युपगमामेयाम्
मप्रनिहितोऽपि श्लेषोऽलंकारत्वेन स्वीक्रियतामिति चेत् न विरोधाभासस्य विरोधत्वेन तच्छ्लेषा
भासस्य श्लेषत्वेन केनचिदनभ्युपगमात् एवं सहृदयमादौ रूपकं प्रधानं श्ले
षस्तु रूपकाङ्गमिति तत एव व्यपदेशोऽस्याप्यः मानः कविभिर्वाक्यादावपि ख्यातिर्भवतीदिव
प्रधानं श्लेषस्तत्तन्निर्वाहकमात्रमिति एवं च गुणीभूतत्वेन श्लेषस्यालंकारत्वायोगात् तदाद्यत्वे मे वेत्यपि केचिदिति
दिक् अथ कुवलयानन्देऽप्युदीरितानामुदाहरणम् प्रकृताप्रकृतश्लेषोदाहरणमाह प्रातीस्मलधनिस्वावतम
वीनैर्विवलितः यथा महात्मनोऽजरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य यस्यानुपप्लवग
तेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् अत्राभ्युदयमारूढः कान्तिमानुन्नतकरः रलः राजा हरति सर्वस्य ए

दयं स्वरूभिः कैः इत्यादौ अत्र गानचंद्रादिष्वप्येवं प्रस्तुतार्थोऽयं नन्वयान्तर निमित्तेषामभिप्रायः किं न प्रस्तु
तप्रस्तुतार्थाभिधानमलंकारत्वमप्रस्तुतप्रशंसालंकारो इत्येव यत्र प्रस्तुतार्थस्यापिधानमप्रतिपादनत्वेन व्यवस्थानं पेक्षातात्
यद्यपि प्रकरणबलेन प्रस्तुतार्थस्यैव स्फुटप्रतीतिर्निर्विषयत्वे सतिपश्चात् अप्रतिपत्तिरुद्धारस्य धनादिकार्याकाराज
कारादिषु शब्दानां परस्परं समभिव्याहारबलात् तद्विषयकप्रतीतेः नेशेषादेक प्रस्तुतार्थः स्फुरतीति भाव
तात्पर्यमेवं न्यूनत्वं संभवः पातनाम्प्रतिपाद्यमानेष्वर्थेष्वेवमदनयेत्यादौ एवमिति प्रकृतार्थोऽयमप्रस्तुतश्चेति नीति
चेतनत्वं हि गूढश्लेषस्य अस्ति चास्यत्रापि गूढश्लेषः [illegible] प्रकाम गुर्वीं लघु विलंघि पयोधरोपरु
द्धः सततमस्तमतागमस्तपाः पतिरपादित्वादि [illegible] कामसत्तरी विभर्ति मंदमग्निं मधुरधामो
पलादर्शितस्य वधूचाभवत्तमः इत्यादिभिरेव श्लेषविरोधाभासापि पत्यैरसंनिधौ अत्र [illegible] हि नसासेन्तु
दाहरणायोः प्राकरणिकार्थबोधानंतरविशेषणसामर्थ्यादप्रस्तुतानि हृदवेष्णादिवव्यवहार [illegible] प्रतीयते त
त्राभवतां श्लेष इति सर्वाभिमतपक्षः यथा रम्या इति प्रासमवतोः पताकाराजिविविक्ता इति वर्द्धयंतो [illegible] ममेवं तनम
व लोकात्तमं पृष्ठभिर्वलभीषु यानः इत्यादावपि गूढश्लेषस्य एव अत्रादितीयांताहि प्रतोपस्थापितामर्थान्तरवासांविभा
क्ति भेदेन पृष्ठभिरनन्वयात् नापि तस्मिन्नधिकपयः श्रियं वहंतः संतोभं पवनभवाजवेननीताः वाल्मीकेरप्

शं·बो·
७०
70

दितरामलक्ष्मणानां साधर्म्यं वपतिगिरां महाशब्दः इत्यादिवद्विभक्तिभेदेऽपि उभयत्र तदन्वयान्नैयत्यं साधर्म्यमिद
निवद्गमस्ति येनातिमश्लेषोऽपि स्यात् समममिति त्वक्रियाविशेषणानां सदृशार्थत्वेनाप्युपपन्नं वस्तुतस्तु श्लिष्टविशेषणानां त्वया
न्याययमतीनं साधर्म्येनालंबते तस्माद्दर्शितोदयबलादेव तदन्वयात्संस्थानमिति यद्धश्लेषः तदन्तं तद्बलादेवस
मशाहृस्य साधर्म्यार्थिककल्पनमित्युपमागामयं श्लेष इति अत्र समवायाधरकृतः यत्तावद्द्वलं प्रत्यकृतार्थस्य शाहृत्वेन
प्राचामभिमतं किन्तु प्रमादे देवेति तदयुक्तं अनेकार्थस्य शाहृस्य वाचकत्वनियंत्रितसंयोगादिरेवा आर्थधीकृ स्मा
पृतिं जनमिति तन्नत्रय विरोधात् अप्रकृतार्थव्यंजकत्वं व्यञ्जनाया एवेति तद्दर्शितं नानेकार्थस्यापि शाहृस्यैकमा
वाचकत्वं प्रसक्तं येन तन्नियंत्रणार्थं संयोगाद्यनुसारः स्यात् अर्थेव यस्य वाच्यतायामप्युपमादेर्वैयर्थ्यं वानपायात्तु य
दप्युक्तं द्वितीयार्थस्यापि शाक्तैव प्रतीतिरित्यादि तदप्यसत् द्वितीयार्थविषयशाक्तैरेव नियंत्रणे स्यात्तेऽकत्वाकृतया
तद्बोधासंभवात् न च नियंत्रणाभावे सिकबोधाजननमात्रं तथा च प्रथमं द्वितीयार्थबोधाभावेऽपि प्रकृतार्थबोधानंतरं
शाक्त्या द्वितीयार्थबोधे बाधकाभाव इति वाच्यं एवं हि प्रथममेव कुतो न द्वितीयार्थबोधः प्रकरणज्ञानस्य तत्प्रतिबंधक
त्वादिति चेत् तर्हि चरममपि कथं न तद्बोधः प्रतिबंधकस्य सत्त्वात् न च तात्पर्यज्ञानस्य तत्त्वाद्द्वयावच्छेदितत्वात् प्रकरणज्ञानेन
एतदुत्तरं प्रतिबंधकज्ञानाभावात् कृतैव द्वितीयार्थबोध इति तथापि द्वितीयप्रतिबंधकज्ञानसंभवात् तर्हि प्रकृती

र्थरूपं कालीनप्रकरणाज्ञानस्थापितस्य शक्तिरनेनप्रतिबंधकत्वं प्रतिबध्यप्रतिबंधकवाद्यसंभवात् किंच प्रकर
णज्ञानत्वेनैव एवं च प्रकृतार्थबोधोत्तरकालीनप्रकरणादिज्ञानस्यापि प्रकृतज्ञानत्वरूपप्रतिबंधकतावच्छेदक
धर्मावच्छिन्नतया उभयोरेव प्रतिबंधकत्वमिति एवं च द्वितीयार्थबोधार्थी मन्यत्र ... व्यंजनैव सा लोके अस्तु विना
ऽपि मितीयमलं पल्लवितेन स्वनामार्थे महामतिविस्तरादौ बाधितार्थबोधस्य ज्ञानतया ऽनुपपादकत्वाच्च कथंचिदुपपत्तावपि दे
वदत्तेन पुत्रं मातेनताडितं शस्त्रप्रयोगेः समभ्यार्थानुपपत्तिः शालकादिना प्रयोगेनुपपत्तिरित्यपि नियमेनाभावात् वह्निभो
दृष्ट्यादिर्वैशिष्ट्यस्यबोधप्रतिभामात्रहेतुत्वादिति अतएवायमतिजरद्गवादिवदन्यापि गूढश्लेषएवेत्यपि पास्तं
समासोक्तावपि व्यंजनयैवाप्रकृतार्थप्रतीत्यभ्युपगमात् अतएव ध्वनिकारेण समासोक्तेर्गुणीभूतव्यंग्यत्वं न भीवः
स्वीकृतः पूर्वप्रकरणे समासोक्तया श्लेषो बाध्यत इत्युद्भटाचार्यादिभिरप्युक्तं तत्रश्लेषत्वे च तद्बाध्यत्वासंगतेन्नुपपत्तेरिति
किंच अनेकार्थस्थले कथंचिदप्रकृतार्थस्य शक्त्या बोधोऽस्तु योगरूढिस्थले तु न तदुक्तिसंभवः यथा चंचलापो
तीतयनं तव जलजानां श्रियं दत्तवत् विपिनेतिं च चलानामपि च मृगीणां कथं नु मा हरसि अत्र चंचलस्य रदिनामाय मा
नोऽश्रीहरणसंभवेऽपि न दत्तं हरिणानां न तदाश्चर्यमिति विवाच्यार्थे पर्यवसन्ने ऽपि केवलयोगमर्यादया स्वर्ग पुत्राणां पनदत्त
णां नेत्रे अभिमौर्देः स्वपाकनउगावेष काथाणामिति जलजमृगशब्दाभ्यां प्रतीयमानस्यार्थस्य विना व्यंजनामनुपपादपितुम

अ॰कौ॰ शक्यत्वात् योगरूढ्यानियमेनैनार्थी तद्बोधसामर्थ्यात् अतएव पंकजादिपदेभ्यः पंकजनिकर्तृत्वप्रकारककुमु
७१ दादिविशेष्यकबोधो लक्षणयैवेति नैयायिकाः नचात्रापि लक्षणैवास्तीतिवाच्यं मुख्यार्थबाधाभावात् नचतात्पर्यबा
71 धादेव साक्षितिवाच्यं चोरव्यवहारे केवलतात्पर्यमिति तात्पर्यानुपपत्त्यभावेन तात्पर्यस्यैवाग्रहात् पंकजनायाय एव तदर्थग्राह
कत्वादित्याहुः इति संक्षेपः ॥ समासोक्तिं लक्षयति यत्रप्रकारवाचकपदमात्रं श्लेषगम्यसामान्यं तद्वृत्तेरप्रकृतार्थो
क्तिः सोक्ता समासोक्तिः यत्रप्रकृतार्थतात्पर्यकवाक्ये विशेषणपदानि वाच्यव्यंग्योभयानुगामीनि नत्वनेकार्थानीति
नियमः तत्रोभयानुगतविशेषणानां सामर्थ्यात् प्रकृतेनाप्रकृतार्थप्रत्यायनं समासोक्तिः समासेन संक्षेपेणोक्तिः प्र
त्यायनादिरूपार्थः एवं च विशेषणार्थकपदमात्रवृत्ति [illegible] साधर्म्यादप्रकृतार्थबोधः सतिफलितं धूमपराभासितता
नादिनावह्निबोधातिव्याप्तिवारणाय सामर्थ्यादित्युक्तं उल्लासितकालकरवालमहांबुवाहे देवेन येन नरदोर्जितगर्जि
तेनतनिर्वापितः सकलएव वैरिनृपाणां धाराजलैस्त्रिजगतीज्वलितः प्रतापः इत्यादौ विशेषणविशेष्योभयश्लेषलो
लक्ष्ये रूपकसाधनावतिव्याप्तिवारणाय मात्रेति तथाच यत्र विशेषणमात्रश्लेषस्तत्र समासोक्तिः विशेष्यस्यापिश्लेष
त्वरूपकसाधनिरेवेतिफलितार्थः अत्रविशेषणसामर्थ्यमेतदेव यदप्रकृतेऽप्रसिद्धधर्मस्य प्रकृते समारोपात्तद्व्यवहारव
त्त्वेरूपकसमातत्त्वप्रतियोगिताः प्रकृतार्थस्यप्रसन्नोतिदितिविधेयपत्रात् प्रकृतेनप्रकृतार्थबोधनं तत्रात्प्रकृतप्रशंसा प्र

७१

हृतेनाप्रकृतार्थबोधनं तत्समासोक्तिरिति विवेकः यथा वा उन्मारयत्यलकमंजरिमंजरीभां वह्नीनकुंभवसनां
चलस्तनोति विविं वाधरं किमपि चुम्बति पंकजाक्ष्याः लोलः कपोलतलयोर्विपक्तनु समीरः ॥ इत्यालकापसारणस्तन
वसनापसारणादयो धर्मा आरूढनायकोभयसाधारणाः समीरपदं तु समारूढनायकव्यापकं अतो नायकप्रसिद्धधर्माणामा
रूढे समारोपात् तदवच्छेदकतया प्रकृतस्य नायकस्य प्रतीतिः अतः समीरे नायकव्यवहारारोपेण चमत्कारः य
द्यप्युक्तधर्माणामारूढेऽपि सत्वेन नायकप्रसिद्धानां तेषामारूढे आरोप इति न युक्तं तथापि मारुते स्तनवसनालका
दिचालनं विशेषतो न प्रसिद्धं चलनदेहत्वस्यैव तत्र प्रसिद्धेः नायकस्य तु स्तनवसनापसारणादिधर्मा एव विशेषतः
प्रसिद्धा इत्यारोपहेतुत्वं नायकनिष्ठानां धर्माणामारूढे आरोप इत्युक्तं अत एवात्र मारुते तन्नायकत्वारोपः शब्दानु
पात्तस्य नायकत्वस्यारोपानुपपत्तेः न चैव व्यवहारस्य शब्दोपात्ततया तत्रारोप्यत इति युक्तं न चैवं मंदस्तायलतामित्यादौ ना
यिकात्वारोपापत्तिस्तस्यादिति वाच्यं तत्रोत्तपुरेणोत्तारोपेण तद्योग्यत्वात् अत्र त्वलकोत्सारणादीनामुभयसाधारण्येन
नायकात्वाक्षेपकत्वासंभवात् न चात्र मारुतेन नायकस्य निवारणादतिशयोक्तिरेवेति वाच्यं उक्तधर्माणां नायक
एव विशेषतः प्रसिद्धेरुक्तत्वेन तद्धर्माश्रयस्य नायकस्यैवोपमानत्वेन भावात् किंच अयमेषी मुखं परपद्मस्य चुम्बति
तं दमाश्रित्यादौ चेदं समासेन नायकोपमानत्वसंभवः चेदयते तुंवनस्पलात्तणिकत्वान्नायकपत्ते च मुख्यत्वात् लात्त

ग्रं· कौ·
७२
72

गिकचुंबनस्यैव साम्राज्यधर्मत्वेन नायकस्यैव कांतानुयोगिकत्वोपपत्तेः किंचिद्व्यवहितयोगिकसंबंधपरत्वे ततः
स्यात्तत्र मुखे मतियोगिकत्व इति रसापकर्षापत्तिरिति भावः । अत्र वदंति प्रकृतनकर्तव्यं प्रकृतनायकादिव्यवहारस्यारो
पत्तत्वमिति यदुक्तं तत्र किं नायकादिविशेषणतो व्यवहारस्य तथात्वं तद्विशेषितव्यवहारो वा । चंद्रादेर्नायकव्यवहारस्य
पतेन नायकसाम्यस्यैव सिद्धापत्तेः न चैतदापत्तिः सर्वसकलकामेदाख्यवस्तायेन व्यवहाराभेदस्यैव कवेर्विवक्षितत्वात्
नायकस्य व्यवहारविशेषणत्वेन नायकत्वाविसिद्धत्वापत्तेश्च किंचैवं निशामुखे चुंबति चंद्र इत्यत्र समासोक्त्यापत्तिः तेन चं
द्रत्वारोपपक्षे निशायां नायिकात्वारोपो विना स्यात् नायकसाम्यात् नायिकालिंगितमुखे चुंबनमात्रस्य चासंभवत्वात्
चमत्कारकत्वाभावेन मुखे चुंबनस्य साधारणनायकव्यवहारत्वानुपपत्तेश्च त्वारोपस्यैव वैयर्थ्यं स्यात् यदि
तु निशायां स्त्रीप्रत्ययघोषं नायिकात्वं समप्रकरणं च इति तेनैव प्रतीयत इति निशा नायिकात्वबोधः स्यात् तदा मुख
स्यापि चंद्र इति तेन बोधे बाधकाभावात् नापि नायकत्वारोपे बाधकाभावः न द्वितीयः मुखे चुंबनमात्रस्य साधार
णत्वात् पद्यालंकारसर्वस्वकारानुयायिना कुवलयानंदकृतोक्तं अत्र विशेषणसाम्यादिना यत्प्रस्तुते अप्रस्तुतस
मारोपणं तत्प्रकृतविशेष्ये तदारोपार्थमेव सर्वथैव प्रकृतानन्वयिनः कविसंरंभगोचरत्वायोगात् तथा च समासोक्ता
वप्रस्तुतव्यवहारसमारोपश्चारुताहेतुरिति प्रकृतेऽप्रकृतरूपारोपोऽपि सिद्धः चंद्रत्वारोपे इत

वंशादिपदसमभिव्याहारवशं चंद्रादौ नायकारोपहेतुना दृष्टपादप्रयोगस्यासत्वात् न चात्र निरीक्ष्य विद्युन्नयनैः पयो
दो मुखं निशायामभिसारिकायाः धारानिपातैः सह किं नु वान्तश्चंद्रोऽयमित्यार्ततरं ररास इत्यत्र निरीक्षणानुगुणनय
नपदोपादानं यथा मेघस्य दृष्टृत्वगमकं तथा नायकत्वारोपगमकं किंचिदस्ति न चात्वप्यागते किमिति पेयत एव
सिंधुरत्वं सेन्त्वं दकृदन्तः किमसौ बिभेति दीपान्तरेऽपि न हि तेऽस्य वदंशोवदोघत्वं राजपुंगव निषेवत एव लक्ष्मीः
इत्यत्र यथा विलकार्यसमस्तमंध्य रूपं राज्ञो विरुद्धत्वगमकं तथेहापि चंद्रस्यापि नायकत्वादिगमकं किंचिदुपात्तं त
था च विशेषणसामर्थ्यादवगतस्याप्रस्तुतवृत्तान्तस्य समारोपादेवात्र चमत्कार इत्यभ्युपगन्तव्यं यद्यप्यर्थयोर्द्वयो
रपि साधारणमविशिष्टमेवेति प्रकृतेः प्रकृतव्यवहारारोपोऽप्रकृतेन प्रकृतव्यवहारारोपो वेत्यत्र विनिगमकं ना
स्ति तथाप्यप्रस्तुतव्यवहाराश्रयधर्मिणि प्रस्तुतव्यवहारारोपस्यावश्यमसंगतिपरिहाराय स्वीकरणीयत्वात् प्रस्तु
तधर्मिण्यप्रकृतव्यवहारारोपस्य स्वीकर्तुमर्हः न वारोपस्यैव वैयर्थ्यमिति वाच्यं स्वरूपतो ज्ञातस्यारोपे चाहत्वाभावा
त्कामुकादिव्यवहारधर्मत्वेन तद्धर्मिसंबंधित्वेनावगम्यमानस्य रसानुगुणत्वादारोपात् कामुकादेश्च शब्दादनुपस्थितस्यापि चुं
बनादिव्यंजितस्य व्यवहारविशेषणत्वं तस्मादयमैंद्री मुखं पश्य रक्तश्चुंबति चंद्रमा इत्यत्र नारसंबंधिता दृष्टा चुंबना
त्मकव्यवहाराश्रयश्चंद्र इति बोध इति तदयुक्तं मुखं चंद्र इत्यत्र चंद्रत्वस्यानारोपेण चंद्रस्यारोप इत्युक्तेनावदसंगतानात्

चंद्रविशेषणस्य चंद्रत्वस्य मुखे आरोपासंभवात् किंतु भेदसंसर्गेण चंद्रस्यैव मुखे आरोपात् किंच ज्ञानादिपदसमभिव्याहा-
राभावाच्चंद्रेन तदनारोप इति न युक्तं शाब्दारोपोपि हि न तत्समभिव्याहारोऽपेक्षितो न तात्पर्यारोपे रूपकध्वनेरुच्छेदप्रसंगात्
न च नञारोप्यमाणासाधारणधर्मेण त्वात्प्रकृतेन तत्तादात्म्यमभिव्यज्यत इति वाच्यं इष्टापि पद्मनायिकावदनचुंबनस्य चंद्रेआ-
रोप्यमाणासाधारणधर्मितेन तत्तादात्म्यव्यंजकत्वसंभवात् एतेन विधुतपनैरित्यादौ वा लक्षणादेः पुरुषत्वायातेपा-
कस्यैवात्र चंद्रे ज्ञानत्वासाधारणोपकत्वमिति निरस्तं न च चंद्रनादौ ज्ञानत्वाद्यारोपं विनापि ज्ञानव्यवहारारोपसंभवेनानुपपत्त्यभा-
वात् मनस्य ज्ञानत्वासाधारणोपकत्वमिति वाच्यं अप्रेत्यरूपणात्मकस्यानुपपत्तिस्वापेक्षत्वेपि व्यंजकरूपणात्मकस्य तदनपेक्षत्वा-
त् अन्यथार्थापत्त्यैव निर्वाहे व्यंजनवैयर्थ्यप्रसंगात् तथापि ज्ञानादेर्व्यवहारविशेषणत्वेनोपस्थितिश्च वर्णवाचांग अन्यथा
स्वरूपेण व्यवहारस्याज्ञारोपवाहकत्वानुपपत्तेः एवं चावश्योपस्थितिकस्य ज्ञानादेस्तादृशचुंबनकर्तृत्वे चंद्रादावेव तादात्म्येन वि-
शेषणत्वेऽस्यवितं न तु व्यवहारे भेदसंसर्गेण चंद्रज्ञानयोरभेदप्रतीतिं विना पद्मनायिकावदनचुंबनस्याप्रियत्वादेत् अ-
पि च निशामुखं चुंबति चंद्र एष इत्यत्र स्त्रीपुंलिंगाभ्यामेव चुंबनरूपार्थसहकारेण नायिकात्वं नायकत्वं च व्यज्यत इति नि-
र्विवादं अन्यथा निशामुखं चुंबति चंद्रकेषा अत्र हर्म्यस्थं चुंबति भानुर्बिंबं इत्यादावपि तद्व्यंजनानापत्तेः एवं च स्त्रीमत्यादिना
व्यज्यमानं नायिकात्वादिकं निशादेर्नायिकात्वपवपघिवस्यतिव्यंजकस्य स्त्रीत्वादेः स्वसामानाधिकरण्येन तदारोपकत्वे

७३

विस्यात् निशावाचिनो नायकत्वाख्यधर्माविशिष्टयोः प्रतीतिरितिसर्वेष्वकारकेषु विरोधाच्च अविनाभावादप्रकृतव्य
वहारात्विमेन धर्मिणोव प्रस्तुतो धर्मेवच्छिद्यत इति तद्विवरणग्रंथाच्च नायकत्वारोपस्यैव प्रतीतेः किंच व्यवहारात्ति
मस्य नायकस्य तद्विशेषणत्वमेव न तु चंद्रादिविशेषणत्वं तत्समानाधिकरणपदार्थपस्याप्यत्वादित्युक्तं तत्रप्युक्तं
एवं सति निशायामपि नायिकात्वारोपो न स्यात् किंतु व्यवहारविशेषणत्वेनोपस्थितिरेव तच्च न संभवति नायिका
त्वानालिंगितकेवलरात्रिमुखचुंबनस्य नायिकासंबाधित्वात् रात्रितादात्म्यं विना नायिकानामसत्त्व विशेषणत्वा
योगाच्च किंच निर्लज्जीकाभवत् प्राचीं प्रतीचीं याति भास्करे प्रियेविपत्तरमणीं प्रियेतेकामरसं भवति इत्यत्र भास्क
रस्य नायकत्वाप्रतीतौ उत्तरार्द्धे प्रियेत्यादिना समर्थनमप्यनुपपन्नं स्यात् अयं च अप्रकृतव्यवहारः प्रकृतविशेष्ये
तद्व्यवहारतादात्म्येन प्रतीयते तदभेदेन वा नाद्यः तथा सति पुंसो मुखचुंबनकर्ता चंद्र इत्येकवद्रूपमितिरीत्या बो
धः स्यात् न चेष्टापत्तिः पुंसां नायिकात्वस्य चंद्रे नायकत्वस्य चाप्रतीतिप्रसंगात् नांत्यः तदपेक्षया प्रकृतव्यवहारवि
शेष्यकारोपस्यैव युक्तत्वात् न तु भेदसंसर्गेणाप्रकृतविशेष्यतदारोपस्यापि अभेदांशे व्यवहारांशे वारोपद्वयप्रसंगा
त् प्रमाणाभेदांशमात्रारोप इति विशेषः तस्मादप्रकृताभेदेन भासमानः प्रकृतव्यवहारः स्वविशेष्ये तद्विशेष्याभिन्न
तयाध्यवसितत्वे भासते तथा प्रकृतार्थोपस्कारकतया गुणीभूतोप्यनुक्तं अयं तु विशेषः यथात्वप्यादन्तरेवात्मनामि॰

पृ०
७५
74

त्वादे रूपकप्रकरणोदाहृते त्वत्पादनखरत्नानामलक्तकमार्जनमिदं श्रीखण्डकरणकचन्द्रधवलीकरणाभिन्नमिति वि
शिष्टमार्जने विशिष्टधवलीकरणारोपः न तद्वदत्रापि पद्येऽस्मिन् मुखचुम्बनकर्तृत्वं चन्द्रो नायिकामुखचुम्बनकर्तृनायकाभिन्न इ
ति शाब्दबोधः नायिकेत्यादिभागस्य शाब्दबोधाविषयत्वात् किं च प्रकृतवाक्यार्थघटकाः पदार्थाः अप्रकृतपदार्थसाम
त्वेन भासमाना नैवाशिष्टमन्तर्भवन्तो महावाक्यार्थरूपेण परिणमन्त इति तथा च पद्येऽभिन्ननायिकामुखचुम्बनक
र्तृचन्द्रनायकरतिर्बोध इति तस्मादप्रकृतव्यवहारस्यैव चन्द्रादावारोप इति मतं निर्युक्तिकमेवेति ॥ अत्रेदं प्रतिभाति ॥
तन्मते उभयत्राभेदारोपसत्त्वे न लाघवावकाशः तद्वदिह नायिकाया राज्ञो नायकस्य च चन्द्रेऽभेदारोपः तथा तन्म
तेऽप्रकृतव्यवहारस्याभेदसंसर्गेण प्रकृतव्यवहारे आरोपः अप्रकृतव्यवहारस्यैव चाश्रयतादिभेदसंबन्धेन चन्द्रा
दावित्युभयत्र संसर्गभेदः मम तूभयत्राप्यभेद एव संसर्ग इति लाघवं इति वाच्यं मन्मतेऽप्रकृतव्यवहाराद्यप्रसक्तत्ति
प्रकृतव्यवहारस्यैव चन्द्रे बोधात् तस्य चारोपाभावात् किं तु प्रकृतव्यवहारेऽप्रकृतव्यवहारारोपेण लाघवात् तथा चाभे
दमेव संसर्गीकृत्यारोपद्वयमिति गौरवं अप्रकृतव्यवहाराभिन्नप्रकृतव्यवहारस्य चन्द्रे बोधे चन्द्रविशेष्यकाऽप्रकृतव्य
वहारारोपानपेक्षणात् अप्रकृतव्यवहाराभेदेन प्रकृतव्यवहाराभेदेन चन्द्रादावारोपे प्रयोजनाभावात् न चैवं मा
ति प्रकृतविशेष्यकाप्रकृतविशेष्ये अप्रकृतव्यवहारारोप इत्यादिग्रन्थविरोधापत्तिरिति वाच्यं स्वाभिमतांश्रयत्वसंबन्धे

नाम्नः कृतत्वव्यवहारस्य चंद्रादावारोप इति तदर्थात् भवति । एवं कृतत्वव्यवहाराभिन्नाम्नः कृतत्वव्यवहारस्तत्रापि यच्चंद्रादिरि
ति अपि च पत्रवक्त्राचार्याभिप्रायेणैव वाक्यप्रयोगे प्रोक्तादिनान्तस्य तत्स्वरूपार्थो गम्यते तत्र वक्तृतात्पर्याभावात्तेन
तत्र कबोधसंभवः यथा दृष्टविवरिनेन त्वलसि दृष्टां किं मत्तकामकलघमानमवासलालितेश्र्वतःकलदं सिवापि
कामपि पुनरेष्वास्ति पंकजालयम् इयं दिदृर्वा समः प्रायेण सरस्वत्यां भूमिं प्रतिमश्यान्तकामायां तास्मिन्नेवावसरे हृ
तस्य हंसीं प्रतिपद्यास्तु तेनोक्तिः सरस्वत्यान्तसारूप्यान्तस्य सत्र स्तलोक इत्यजत्वत्तानाभिप्रायेणापोजितेतितदभि
मतस्य प्रत्ययस्तलोकाभिमानस्तागेकाविरहवतीं हंसीं रूपामरस्वतीति बोधस्यात्रासंभवात् किं च प्रत्ययविशिष्ट
स्य विशिष्टेनाभेदान्वयः अभेदप्रतियोगिनोऽर्थस्य प्रातिपदिकादनुपस्थितत्वादिति तु कार्ये द्वादीनामभेदेन नायिकादावन्व
यबोधस्वीकारोऽनुचितः एव इति नाहि वाक्यार्थस्येव प्रातिपदिकोपस्थितिः यतस्तानन्तपदार्थस्य भेदप्रतियोगिन एव प्रा
ह्योपस्थितिस्तथा न तु तदनुयोगिन इति वाच्यं समासार्थे येन वाक्यार्थस्य पदादनुपस्थितानां तदभेदबोधः पदार्थे तु प
दादनुपस्थितेऽपि पदार्थानामभेदो बुध्यत एवेति वाच्यं समवकाशः अत एव नायकादेः पदादनुपस्थितस्य तु चंद्रादावारो
पः स्यात्र हषगंपडकं आर्थारोपेन समानविभक्तिकपदाकांक्षेति तदप्यपास्तं अत्रापि वाक्यार्थे विशिष्टस्यारोप आर्थ
एवेत्यपि वक्तुं शक्यतया व्यक्तविलयापत्तेः किं च नायकाद्यारोपमंतरेणापि चंद्रादौ तद्व्यवहारारोपसंभवान्न तत्र

मु॰ की ज्ञानारोपे किं विहमकमस्तिय त्वव्यंजकस्यानुपपत्तिनिरपेक्षस्यैव व्यंजकत्वमिति तत्रापि तत्प्रकृतानकूलार्थव्यंजक
७५ त्वनियमभंगापत्तेः किं चैवं वयं निष्प्रकारतो ग्रलसत्त्विस्मणोभुजाणा ग्राणमोपुनिपणामलिङ्गिमग्रे इष्टभणीयणाणांग्रेणीप
75 फुलविलोचनणाज्ञाया इत्यत्र प्रफुल्लविलोचनत्वेन वस्तुना हर्षव्यंजनेऽपि कथं मदुपभोग्यत्वरूपवस्तुव्यंजनं न च दर्श
णस्य जनकतया तदुपभोग्यत्वादेरपदृति वाच्यं दर्शनस्य पुत्रलाभादिनापि संभवेनानैकान्तिकत्वेन मदुपभोग्यत्वादेरक
त्वासम्भवादिति वाच्यं वाग्रलसपिरोमणित्वादिरूपेण विशिष्टप्रफुल्लविलोचनत्वस्य कारणांतरस्यापि सहकारेण मदुप
भोग्यत्वरूपवस्तुव्यंजकत्वमिति स्वोक्तिव्याघातापत्तिः । यदपि स्वरूपतो व्यवहारमात्रारोपस्य चारुत्वाभावात् व्यवहार
विशेषणविशिष्टप्रफुल्लविलोचनत्वस्य कारणांतरस्यापि सहकारेण मदुपभोग्यत्वरूपवस्तुव्यंजकत्वमिति स्वोक्ति-
व्याघातापत्तिः । यदपि स्वरूपतो व्यवहारमात्रारोपस्य चारुत्वाभावात् व्यवहारविशेषणत्वेन ज्ञानादुपस्थितिरवश्यमंगी
कार्या एवं च ज्ञानादेरभेदेन चंद्रादावारोप उपपद्यत इति तदपि न ज्ञानादेरभेदेन चंद्रादावारोपं विना तथापि ज्ञानादेर्व्य
वहारविशेषणत्वेनानुपस्थापनस्य सुवचत्वात् अन्यथा मुखं चुंबन्नकर्ता चंद्रमा इति बोधे चंद्रे ज्ञानत्वारोपकाभा
वात् एवं चोभयत्र तदव्यापेक्षया व्यवहारस्यैव तदोषो युक्तो लाघवात् एवं ज्ञानत्वाभेदेन चंद्रबोधं विना परम्परयापि कावद
न चुंबनस्यासंभवात् इति तत्र भेदप्रतीत्यभावमात्रेणापि तदुपपत्तावभेदप्रतीतेरनुपयुक्तत्वात् यदि मुखं चुंबनादि

सहकारिमात्रं एवं चुंबनादिनास्व विशेषणत्वेन न तदाते प्रसंगः किंच स्त्रीलिंगादिकं न निशायांसं नायिकात्वादिं
व्यंजकं निशामुखं चुंबति चंद्र इत्येकैषा इत्यारोपितयाप्यतेः किंतु चुंबनादिकमिः पुंस्त्वादिसहकारिणोवयवं च चंद्रग
तं पुंस्त्वं निशायां नायिकात्वं चंद्रस्य च नायकत्वं गमयतीति पर्यवसानात्तत्कथ्यमाने एकसामानाधिकरण्येन नायि
कात्वादिप्रतीतिः स्यात् स्त्रीत्वादेस्तदा देयकत्वाभावात् पुंस्त्वादेश्च नायिकात्वादिसामानाधिकरण्याभावात् यत्तु
निशाशशिनोर्नायकत्वाद्यध्यधर्मविशिष्टयोः प्रतीतिरिति ग्रंथस्वरसदर्शनं तदपि न नायकस्य व्यवहारविशे
षणतया परंपरया तद्विशिष्टमित्यत्रैव तात्पर्यात् व्यवहारारोपसंगीकृत्य नायकाद्यारोपनिरासतात्पर्यके ग्रंथे तदभे
दारोपाभिप्रायस्याशंकितमप्यशक्यत्वात् यदपि व्यवहारो नायकाद्यनारोपे निशायां सपि नायिकात्वाद्यारोपस्याप्याव
श्यकत्वात् नहि द्विना यिकाद्याव्यवहारे विशेषणतया त्वयवोधः संभवति सुखचुंबनरूपव्यवहारस्य तदसंबंधिता
त् नायकस्य तदसंबंधितयाऽन्वयेन संबंधात्सक्ताकांक्षितत्वाच्च तदतिरिक्तव्यवहारस्य वानुपात्तत्वात् अत उक्त
रीत्यान्वयस्यैवोचितत्वात् यदप्युक्तं निर्लक्ष्मीकाः भवत्प्राची प्रतीचीं याति भास्करे प्रिये विदेशस्थ रमणी स्मर्तिकामुद
मं च तीत्यत्र भास्करे प्रियत्वाद्यवोधे प्रिये विपन्नरमणीत्वादिनासमर्थनानुपपत्तिरिति तदपि न तत्प्रस्तपवत्तदोषात्
न हि भास्करप्रियेव्यस्तके प्राचीनायिकाः स्यते इत्युक्ते प्रियत्वादिना समर्थनं संभवति अभेदसमर्थ्यसमर्थकभावान्तुप

श·कौ· पतेः अस्माकं त्वप्रकृतव्यवहारानपेक्षत्वेनोत्तरार्द्धस्यानिर्लक्षणिकत्वसंपादकतोपयोगस्यस्पष्टत्वात् तस्मात्समासेकौ
७९ व्यवहारस्यैवाभेदेनाप्रकृतव्यवहारेआरोपइतिस्थितं अतएवगांगं चुंवतिपांडिमाधरंवपुस्त्वास्वादयतुलवणः प्रासोमिस्त
76 निमानतनोतिचततोराश्लेषमणिदृषाः तापस्तावत्साकरोतिवसमंभ्रांतः किमावेद्यतामेतेयन्यतमास्तमेवविधिनावामे
ननिर्वासितः ॥ कपोलेपत्रालीकरतललिरोधेनमृदितानिपीतोनिःश्वासैरयममृतहृद्योऽधररसः मुहुःकंठेलग्नस्त
रलतिवाष्पस्तनतटंप्रियोमन्युर्जातस्तवनिरनुरोधेनवपुषा ॥ इत्यादौचनरसाभासत्वापत्तिः इहहिपांडुत्वादिगुणवद्गु
गांगंचुंवनादिव्यवहारारोपात् पांडुत्वादौनायिकात्वारोपेयुगपदनेकनायकसंबंधोऽवतिप्रतीत्यादौविनाऽनुरसाभासप्रसंगो
दुर्वारःस्यादितिदिक् ॥ अथकाचिल्लौकिकेशास्त्रीयव्यवहारारोपः यथामहींपराजतिकेवलात्वसितनौप्राग्णोव
प्रार्थितास्लेषादौव्यतिरेकिकेवलमिदंसकलंसमाकर्णितेमोदेनिव्यतिरेकिचान्यपिचतेरंभोरुवलोजयोविध्येवात्रतनु
त्वमंगगमनेलीलात्वमल्लोलस्तथा अत्रनायिकायाः रूपेसर्वांगव्यापकतायांनैयायिकप्रसिद्धाभावान्ततियोगित्वकेव
लान्वयित्वव्यवहारारोपः क्वचिच्छास्त्रीयेलौकिकव्यवहारारोपः यथाममसामानमव्ययसमाश्रयणाद्विभक्तिरतीना
तिजामपितथाविधतांविदध्यात् स्वकृतंतादयस्यपुनर्योगयोग्यतस्मादिलोपविधिमन्वशिषत्स्वनीतिः अत्राव्य
योतरविभक्तेर्लोपाभवतीतिवैयाकरणव्यवहारः तद्वित्तदिंसारनवलवत्व्यवहारारोपः क्वचिच्छास्त्रीयेशास्त्रीयव्यव

द्वारोपः यथामम कर्मण्येणावप्नगणो प्रयाते कर्तृत्वमाख्यानविवर्जितेपि स्वद्वारमहं संविदधत्परस्मैपदायनत्वं
कथमत्र द्वारा अत्रवडभिलोककर्मणि कर्तृत्ववाग्वत्त्वमाख्यानात्मकज्ञानसाधनानामभावेपि सति प
रस्मैमोत्तवृपायपदायस्तुद्वारं उर्वनीम्पनेनोकर्मसत्त्वे मोसोनभवतीति वैदिकव्यवहारे अणौ अण्यन्तावस्थायांक
र्मीभूते पदार्थे अन्नणाविति नः समासद्वयेन ण्यन्तावस्थायां कर्तृभूते सति अनाख्यानेऽस्मरणाभिनार्थे आत्मनेपदवि
धाना नाट्यशास्त्र लेपरस्मैपदं णौ रणौ यत्कर्मणौ चेत् सकर्मकानाख्यानेवृत्तिस्तत्रेण भवतीति वैयाकरणव्यवहारारोपः
एवं शास्त्रान्तरेष्वप्युदाहार्यं ॥ इति समासोक्तिः ॥ निदर्शनां निरूपयति ॥ उपमापर्यवसन्नो यत्रार्थो
ऽसम्भवन्नन्वयानहः । यत्र क्रियया कारणकार्यान्वयधीर्निदर्शना सोक्ता ॥ यत्र पदार्थयोर्वाक्यार्थयोर्वा ऽसम्भव
न्वा वाक्यतया ऽन्वयबोधाजनकयोरुपमानोपमेयभावं कल्पयित्वैवान्वयबोध पर्यवसानं सा निदर्शना यत्र च का
र्यकारणयोः क्रियया हेतुहेतुमद्भावेन प्रतिपादिते उत्तरवाक्यार्थः पूर्ववाक्यार्थप्रतिपाद्यसामान्यकार्यकारणभावेदृष्टां
ततया पर्यवस्यति सा द्वितीया निदर्शनेत्यर्थः ॥ आद्या यथा महाराजतेऽस्मात्परान्तसंगृहीतमालोक्य वाणाकयस्यो
कौ केनोत्तंगणिशिखाकलापकपिलो वह्निः पटान्ते शिखापाशैः केनसदागतेरगति तास्समापादिता केनानेकपयो
नवासितसत्वः सिंहार्पितः पंजरीभीमः केन च नैकनक्रमकरो दोर्भ्यां धृतो ऽर्णवः अत्र द्विरास्तसोप केनात्रानीत

अं.कौ. इति पूर्ववाक्यार्थो वह्निर्विस्ताचलेके नवद्दृश्यतरवावगार्थः नचैतेषां परस्परमन्वयबोधः संभवति अतो यथा वह्नि
१८ र्विस्ताचलवंधनं दुःकरं तथा रात्रसग्रहमयोन्यादिक्रमेणोपमायाः पर्यवसानं तथा च वह्निर्विस्तां चलवंधनप्रतियोगि
72 कसादृश्यपवद्रात्रसग्रहणाकर्ता जिज्ञासाविषय इत्यादिः पर्यवसितबोधाकारः नच रूपकपर्यवसानमेव कुतो न भ
वति रात्रसग्रहणारूपवह्निर्विस्ताचलवंधनकर्तीक इति बोधसंभवादिति वाच्यं प्रकृते प्राधान्यभंगापत्तेः एवमपि व
ह्निर्विस्ताचलवंधनाभिन्नरात्रसग्रहणकर्तीक इति बोधः कुतो न स्यात् एवं प्रकृते प्राधान्यभंगाभावादिति वाच्यं रात्र
सग्रहणस्य प्रकृतत्वेन तत्रोपमेयत्वस्यैव वाच्यत्वात् रूपकापेक्षया उपमायाः प्रथमप्रतीतिकत्वाच्च नचात्रध्वन्यो
पमेवास्तु किमलंकारांतरकल्पनयेति वाच्यं उपजीव्यत्वेन तदभ्युपगमादित्याहुः परार्थनिदर्शना यथा घृणिणीश्र
महाणासकमलगामसिमलिणीयणादंसणेन किं तं सुहृद्दंसिन्न इश्वंदायाथं गाश्रपद्दणा अन्यावस्थान्येन कथं प्राप्य
त इत्यतो नु खेचंद्रयोरुपमापर्यवसानं अथवावस्थासदृशावस्थायां लक्षणा सादृश्यप्रतियोगिन्यामवस्थायां चंद्रा
णत्वपः अतोलमोपमेवेयमस्तीति चेत् न अवस्थायामवस्थानिरूपितसादृश्याभावात् चंद्रपदस्यैकदेशान्वयप्र
संगात् खिंडप्राकिंकल्पने च गौरवात् एकपदोपस्थाप्यानां नामांतरसंस्तेऽन्वयासंभवाच्च न्यायपंचाननादयस्तु इ
श्यामलेप्रपमोदाहृतनिदर्शनायामुपमानमप्रसिद्धं वह्निर्विस्ताचलबंधनादेरप्रसिद्धेरद्भुतरसप्रसिद्धमिति विशेषः वाक्यार्थेति

दृशीनायोगिपदस्य स्वविशेष्यजातीयार्थलक्षणायां चेत्पदस्य चेद्भावस्याप्यलक्षणा तेन चेद्भावस्यासदृष्टान्तस्याला-
भेन लक्षणापमैवेत्याहुः ॥ द्वितीयपक्षा ॥ उन्नतं परमवाप्य यो लघुर्लीलयैव स पतेदिति ब्रुवं शैलशेखरगतो
दृषत्कणश्चारुमारुतधुतः पतत्यधः अत्र लाघवे सत्युन्नतपदप्राप्तित्वं कारणतावच्छेदकं पतनत्वं कार्यतावच्छे-
दकमिति कार्यकारणभावः पूर्वार्द्धप्रतिपाद्यः तत्र दृष्टान्ततयोत्तरार्द्धोपादानं तेन लाघवे सत्युन्नतपदप्राप्तिः पातहेतुः
यथा दृषत्कणस्येति दृष्टान्तपर्यवसानान्निदर्शनात्वं न चात्रानुमानमेवेति वाच्यं पक्षादेरनिर्देशात् न चायं ति-
ष्ठितपतनकः लाघवे सत्युन्नतपदप्राप्तिमत्वात् शैलाग्रगतदृषत्खण्डवदिति वाच्यं एकत्र लघुत्वमल्पत्वं द्वितीयदृ-
ष्टान्ते त्वपकृष्टगुरुत्वयोगित्वं उन्नततावमतत्कृष्टत्वं ऊर्ध्वदेशावस्थितत्वं चेति भेदात्पक्षे पतनं पदभ्रंशो दृष्टान्ते त्वधः-
संयोगहेतुक्रियेति भेदाच्च अथ लघुत्वोन्नतत्वादीनामभेदाध्यवसायेनोभयत्र हेतुत्वान्न दोषः वास्तवव्याप्त्यभावेऽपि क-
विश्रान्तिभाक्कल्पितव्याप्याद्यबलादेवानुमानालंकारप्रवृत्तेः अन्यथोत्तरार्द्धस्य पूर्वकारणकार्यभावदृष्टान्तत्वानुपपत्त्या
त्वन्नतस्यापि विलयप्रसंगादिति चेत् तथाप्यत्र लघोरुन्नतपदप्राप्तेः पातं प्रति हेतुताया एव प्रतिपाद्यत्वेन कस्य
